KASHMIR SERIES

OF

TEXTS AND STUDIES.

KASHMIR SERIES OF TEXTS & STUDIES
No. LXXII.

THE
PRĀSĀDAMANDANAM


BY

SŪTRADHARĀMANDANA

EDITED
BY

PANDIT JAGADDHAR ZĀDOO SHASTRI
MA M.OL, HH
Superintendent Research Department,
His Highness' Government,
Jammu & Kashmir,
SRINAGAR

Published under the authority of the Government of
His Highness Rājarājeshvara Maharājadhirāj
SRI MAHARAJA HARISINGHJI BAHADUR
G.C.S.I., G.C.I.E., K.C.V.O., LL.D.
MAHĀRAJA OF JAMMU & KASHMIR



SRINAGAR:
Printed at the Shree Durga Press
1947 A.D.

कश्मीरसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः ७२

प्रासादमण्डनम्

श्रीसूत्रधारमण्डनविरचितम्

श्रीराजराजेश्वर-महाराजाधिराज-कश्मीरनरेन्द्र
श्रीहरिसिंहजी बहादुर आज्ञया
रिसर्चकार्यालयाध्यक्ष पण्डितजगद्धरजाडूशास्त्रिणा
तद्विभागकार्यालयस्थेतरपण्डितसहायेन
संशोधनादिसंस्कारणोत्तरं
संपाद्य
श्रीनगरे 'दुर्गाप्रेस' नाम्नि मुद्रणालये मुद्रापयित्वा
प्राकाश्यमुपनीतम्।



संवत् २००४ सन्न ईस्वी १९४७

कश्मीर—श्रीनगर

Printed at the DURGA PRESS, SRINAGAR.

Published by PANDIT JAGADDHAR ZADOO SHASTRI M.A, M.O.L,
for the Research Department
Jammu and Kashmir Government Srinagar.

PRASADA MANDANA.

PREFACE.

Prasadamandnam is a brief treatise on Hindu Architecture and sculpture, outlining the procedure to be adopted in the construction of temples for gods and goddesses. It is for the first time that an edition of the work of this type is being brought out by this Department.

Following is a short description of the manuscript which forms the main basis of the present edition :-

No : of manuscript : 2803 [R.N. Library Catalogue]

Name of the manuscript:	Prasadamandanam.
Name of the author :	Mandana Sutradhara
No : of leaves :	21
No : of lines per page :	9
No : of letters per line :	46
Script :	Devanagri
Shape :	Talapatra
Condition :	good and complete.

The manuscript is almost correct, notwith-standing the unfamiliar construction of the technical

language used in the text, where tbe copyists are generally expected to commit blunders. There are also a few lacunea which could not be filled up in absence of other manuscripts.

The manuscript begins with the following lines :—

श्रीगणेशाय नमः। श्रीकरञ्जेश्वर्यै नमः।
गणेशाय नमस्तस्मै निर्विघ्नसिद्धिहेतवे॥
आदिगौरीसमुद्भूततेजसोंऽश भवाय वै॥१॥
महामायेति या गीता चिन्मयी मुनिसत्तमैः।
तनोतु वाक्-विलासं मे जिह्वायां सा सरस्वती॥२॥
सृष्टं श्रीसूत्रधारस्य प्रसादाद्विश्वकर्मणा।
प्रासादमण्डनं ब्रूते सूत्रधारेषु मण्डनः॥३॥

It ends :—

श्रीविश्वनाथगणनाथमहेशम्बाडी —
श्रीविश्वरूपजगदीश्वरसुप्रसादात्।
प्रासादमण्डनमिदं रुचिरं चकार—
श्रीमण्डनो गुणवतां भुवि सूत्रधारः॥
इति श्रीसूत्रधारमण्डनविरचिते वास्तुशास्त्रे
प्रासादमण्डनेऽष्टमोऽध्यायः॥८॥

As alluded to above, the manuscript is a brief compilation of the books on the ancient Indian architecture. It consists of eight Adhyayas or Chapters. The first deals with मिश्रकलक्षण i e. the preliminaries in the architecture of temples; the second tells us about the mouldings of the base; the third describes measurements etc; of the

Pitha the [Pedestal], Mandovara (Munder) Garba griha (the sanctuary of the temple) and Udumbara (the threshold); the fourth Adhyaya treats of the various sizes of statues, their positions, flag-staffs and Kalasha or the finials; the fifth, sixth and the seventh give details of Phalana, Nandna, storeyed buildings, various constructions of the temples, Kesari etc., fifty four classes of Meru (a class of building mostly storeyed), Mandapas (pavilions and open halls and Balanaka, a raised platform along the wall of the council hall of a temple): the eighth briefly mentions the ways regarding the conservation of the temples and the religious merit which one attains as a result of the work of repairs done to them; flaws in the architecture of the temples are also enumerated. The chapter ends with brief details regarding the construction of Mathas — monasterics, the institution of a stationery idol, worship to the Chief architect, laying the foundation of a Jaina temple and the installation of the Vastu-purusha [home diety].

I am pleased to record my thanks to the editing staff and other members of the Department, who have in various ways helped me in bringing out the present edition of the Prasadamandana.

J D. ZADOO

INTRODUCTION

The Title

Prasadamandana literally means the ornament of temples or palaces, whereby the author seems to presume that the book under edition is one of the best treatises on the Indian architecture and sculpture. The word Prasada, generally, means a palace. It also conveys the meanings of a temple, an edifice, a platform, and a Buddhist assembly or confessional Hall. There seems to be a significant usage of the word Mandana in the title of the book, Mandana besides conveying the idea of an ornament signifies the name of the author – Mandana Sutradhara who is the composer of the present book Prasadamandana may, therefore, mean a treatise outlining the principles of architecture of temples and palaces set forth by Mandana.

As is evident from the brief contents of the text, it seems to be an abstract of Vastu-shastra, one of the works on Indian architecture by the same author, Dr P. K. Acharya mentions 300 manuscripts on Indian architecture lying scattered in the various libraries in and outside India, Very few of them have been published on modern lines of Research and criticism, one among them being Manasara edited by Dr P.K. Acharya in 5 volumes, It is a monumental work of his 17 years hard and patient labour, which has shed a considerable light on the Indian architecture and a branch of literature which was neglected and dubbed as the most barbarous piece of sanskrit literature

Origin Beginning of Hindu Architecture can easily be traced to a period earlier than that of the Vedas. We find architectural terms mentioned in the literature covering a wide range from the Vedas down to the Kavyas and Nataks. Like all other shastras Hindu Architecture and sculpture also claims divine authorship. Vishva Karman is a divine architect and sage Maya another, mythical engineer who is reputed for his wonderful construction of the council hall of king Yudhishthira, described in detail in the Mahabharata. Several works in sanskrit on Hindu architecture and sculpture have been ascribed to these heavenly architects.

A great mass of this type of literature seems to have been written by various authors, some of which must have been of a pretty high standard. All other later works are simply compilations. The compilers of such works have clearly acknowledged the sources they have drawn upon. Some of the compilers of the architectural treatises made futile attempts to pass off their books as original works, but a cursory study of the language, style and construction of the works corroborated by other internal evidence, has clearly revealed the authors' failure to save them from exposure.

Treatises on all branches of Vedic and post vedic literature besides the Buddhists works seem to have reserved some chapters for the elaborate details regarding the erections of temples, palaces, town planning, monasteries, pavilions, including numerous varieties in the architectural domain. In the Vedic texts mention

is made of the stone walls, stone-houses, stone-forts and the walled cities. Five kinds of abodes for the residence of the Bhikshus, have been ordained by the Buddha, which are the Vihara [monastery], Ardha-yoga [bungalow], Prasada [storied mansion]. Harmya [palace] and Guha [cave temple]. Epics and Puranas not only give elaborate descriptions of the structural varieties of Hindu architecture but also the details about a score of important ancient architects who seem to have been authors of standard works on Indian Architecture and sculpture.

The Author

The authorship of the Prasadamandana has been ascribed to Mandana or Mandana Sutradhara. He must have been, by profession, it is presumed, a Sutradhara – a carpenter, a mason or both. Or, on account of having compiled a few hand-books on Hindu art and temple architecture, people gave him a nick name of Sutradhara by way of playful intimacy. Other treatises on the construction of royal mansions — Rajavallabha-mandana, and on the general principles of the Hindu Architecture - Vastu-Shastra, are also from the pen of the same author. His compilations are brief and succinct.

Prasadamandana or other compilations on Hindu Architecture and sculpture by Sutradhara Mandana seem to be modern compilations. The specific usage of some of the words, Bhitta, Phalana Mandovara etc. which I have come across in the text under edition testify also to that direction. Compilations of this type seem to have been written not as much

with a view to contain instruction to the would-be builders and carpenters as with the aim of advising the kings and other men intending to build temples, as to how they should direct the artisans to proceed with the constructional work on lines and forms ordain-ed by the Shastras. In a way, it or any other book on the subject of Indian architecture of modern times, is not so much as a guide book for young artisans as it is more or less a book of injunctions on the Vastu-Kriya. I don't think this statement pertains to the older works of high standard and orginality. They are the fountain heads of the science of Engineering which have afforded great resources to later authors who unmindful of the scientific treatment of the subject, seem to have written numerous compilations for the use of religious-minded people, who out of faith or for attainment of religious merit, erect temples for the propitiation of their beloved deities. Much stress has been laid on the particular period of time, the auspicious conjunction of stars, the pacificatory rites and all other items conducive to the successful completion of the constructional work of the temples and edifices, by the different group of authors of such compilations to ensure happy future of the constructors of the holy abodes of gods.

Text General topics dealt with in Prasadamandana are not original but repetitions of the items already treated exhaustively in older works It begins with the usual solutations to Ganesha for warding off of the obstacles. Another homage is paid to Karanjeshvari ——

the Divine Mother of trees which are the main sources of timber for constructional work of the temples and mansions. In Manasara, a long detail is given regarding the collection of logs of wood, with unique formalities to be observed by the chief architect — Sthapati who will be incharge of the constructions. The same procedure to be gone through at the laying out of the foundations or on the opening ceremony of an edifice, says Mandana, is to be observed in the case of temples also. God Shiva is also propitiated being presumably the presiding deity of the science of Architecture. As a result of Shiva's propitiation there arise, it is said, fourteen kinds of the temples out of which eight are considered to be the best. Then comes the selection of site and the examination of the soil. The plots thus chosen for constructional work should be demarcated and worship offered to them with flowers, rice, and other material for worship. The guardians of the quarters and sub-quarters are also to be worshipped. Importance is laid on the careful observation of the auspiousness of the time, the day, the month, the hour, the minute or the fraction of a minute when such constructions are to begin. Foundation should be dug down says the author, till the appearance of stone or water bed, when a tortise (Kurma) should be firmly fixed. During the process of masonary work songs, music, dancing should continue. Regarding the merit which arises out of the construction of a temple of any material, it is said that out of temple made even of grass, springs up merit that kills one crore sins; the one made of earth bestows the merit ten times the former

the one made of bricks gives merit capable removig of one hundred crore of sins; bliss adinfinitum accrues from stone-built temples.

Details about the construction of Jagati — the base of the temple are next discussed, Its importance is magnified in the same way as that of the construction of a Simhasana – the royal throne. It should the erected in five different mouldings in accordance with the shape, and size of the temple. In design it may be high, middle or low according to the construction being three-fold, four-fold or five-fold. Auspicious signs should adorn it and enhance its artistic beauty, Its cornors sh uld number twelve, twenty, twenty-eight or thirty-six in consistence with the various designs of the bases of columns. The pavilions with flights of steps and arches may be constructed with skilled workmanship wherever necessary. Chariot sheds, the monastery and other minor temples dedicated to various gods should be beautifully designed at their proper places The construction of Jagati should be commensurate with the height and magnitude of the temple·

Great emphasies is laid on the apportioning of the quarters for the institution of the images of various gods and godesses. The arrangement of idols housed in the temple must be strictly according to tbe Shastras The position of some of them should be such as to save them from the direct gaze of one another. For example, the position of the goddess (Devi) should not be in front of a phallus-lingam. Position of Brahma, Vishnu, Shiva, Sun and Kumara should be directed towards

the east or the west. Better it would be if the temple-faces would be directed towards the cities. Position of Genesha, Kuvera, and Lakshmi are considered auspicious if they are arranged at the temple-door. Ganesha, Bhairava, Chandi, Matrikas, Kuvera will forestall prosperity if erected to face the south. Hanuman should face the North-east. Positions of the various gods should in no case be changed as they portend evil.

Next the construction of the foundation, the walls and the position of the inner walls, the pedestals of the columns, the Munder with different mouldings, the height and measurement of the sanctuary and the threshold of the Prasada are touched with brief descriptions. Different designs in the construction of doors with the various types of the temples such as Bhumija, Dravda etc., are enumerated. The wings of the doors should be in the ratio of three, five, seven and nine respectively according to the different types of the temples.

A few pages of the text encompass a brief summary of the constructional ways regarding the Shikhara, the lower part of the finial and its size and measurements with other details, inter alia, pertaining to the construction of the upper portion of the temple. Among all the auspicious items of constructions the Kalasha, the eldest son of milk-ocean, and the foremost part of a temple, is said to be conducive to enormous bliss and prosperity of the master, with its

unfurled flag-staff which should be circular and made of strong and durable wood. In no case should there be an omission in the erection of a Dhvaja on a temple, a well, a pond, a chariot, a rampart or royal mansion Demons, it is said, come to reside in temple without flag-staff with the unfurling of which the gods, the manes and other higher divine beings become gratified. There are also enumerated the various kinds of temples with their pavilions running along side of the council hall-walls in the temples.

The book ends with the salutory advice or rather a caution to those who build the temple, or cause them to be built, to the effect that they should not overlook the injunctions of the Shastras enjoining the various auspicious ways and designs or particulars to be observed in the process of the constructions of the temples, All the minute details should be strictly adhered to. Not only the erection of the temples (may be of wood, earth, bricks or stone): digging wells ponds and monasteries etc. does bring everlasting religious merit to the person whose life-mission is the devotion to mankind at large, but also their conservation and repairs executed with a view to remove certain flaws in the component parts of the idols enshrined in them.

Srinagar,
22-7-47.

J. D. ZADOO.

विषयानुक्रमणी

द्वितीयोऽध्यायः।

प्रासादमण्डनं

श्रीसूत्रधारमण्डनविरचितम्



श्रीगणेशायनमः। श्रीकण्ठेश्वर्यै नमः ॥

गणेशाय नमस्तस्मै निर्विघ्नसिद्धिहेतवे।
आदिगौरीसमुद्भूततेजसोंऽशभवाय वै ॥ १ ॥

महामायेति या गीता चिन्मयी मुनिसत्तमैः।
तनोतु वाग्विलासं मे जिह्वायां सा सरस्वती ॥२॥

सृष्टं श्रीसूत्रधारस्य प्रसादाद् विश्वकर्मणा।
प्रासादमण्डनं ब्रूते सूत्रधारेषु मण्डनः ॥ ३ ॥

गृहेषु यो विधिः प्रोक्तो विनिवेशप्रवेशने।
स एव विधिना कार्यो देवतायतनेष्वपि ॥ ४ ॥

हिमाद्रेरुत्तरे पार्श्वे देवदारुवनं परम्।
पावनं शङ्करस्थानं तत्र सर्वैः शिवोऽर्चितः ॥ ५ ॥

---

१ 'वेश्मद्वारि' पाठान्तरम्।

प्रासादाकारपूजाभिर्देवदैत्यादिभिः क्रमात् ।
चतुर्दश समुत्पन्नाः प्रासादानां च जातयः ॥६॥
नागरा द्राविडाश्चैव भूमिजा लतिनास्तथा।
सार्वधारा विमानादिनागराः पुष्पकाङ्किताः ॥७॥
प्रासादमिश्रकाश्चैवमष्टौ जातिषु चोत्तमाः ।
सर्वदेवेषु कर्तव्याः शिवस्यापि विशेषतः ॥८॥
प्रासादानां च सर्वेषां जातयो देशभेदतः ।
चतुर्दश प्रवर्तन्ते ज्ञेया लोकानुसारतः ॥९॥
लक्ष्यलक्षणतोऽभ्यासाद् गुरुमार्गानुसारतः।
प्रासादभवनादीनां सर्वज्ञानमवाप्यते ॥१०॥
शुभलग्ने शुभर्क्षे च पञ्चग्रहबलान्विते ।
माससङ्क्रान्तिवत्सादिनिषेधे कालवर्जिते॥११॥
सर्वदिक्षु प्लवां वा प्रागुदक्शङ्करदिक्प्लवाम् ।
भुवं परीक्ष्य सिञ्चेत् तु पञ्चगव्येन कोविदः॥१२॥
मणिना स्वर्णरूप्येण विद्रुमेण फलेन वा ।
चतुःषष्टिपदैर्वास्तुं लिखेद्वापि शतांशकैः॥१३॥
पिष्टेन वाक्षतैरर्घ्यं ततो वास्तुं समर्चयेत् ।
पूर्वोक्तेन विधानेन बलिपुष्पादिपूजनैः ॥१४॥
इन्द्रो वह्निः पितृपतिर्नैर्ऋतिर्वरुणो मरुत् ।
कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात्॥१५॥
दिक्पालाः क्षेत्रपालाश्च गणेशश्चण्डिका तथा।
इत्येषां विधिवत्पूजां कृत्वा कर्म समारभेत्॥१६॥
धनुर्मीनस्थिते सूर्ये गुरौ शुक्रेऽस्तगे विधौ ।
वैधृतौ व्यतिपाते भे दग्धे नेष्टं कदाचन ॥१७॥

कन्यादित्रित्रिगे सूर्ये द्वारं पूर्वादिषु त्यजेत्।
सृष्टया वत्समुखं तत्र स्वामिनो हानिकृद्यतः ॥१८॥
आयो व्ययर्क्षमंशस्य भित्तिबाह्ये सुरालये।
ध्वजायो देवनक्षत्रं व्ययांशौ प्रथमौ शुभौ ॥१९॥
केषां च मरुतां गेहे वृषसिंहगजाः शुभाः।
हीन आयाद् व्ययः श्रेष्ठः पिशाचस्तु समोऽधिकः॥२०॥
देवतानां गृहे चिन्त्यमायाद्यङ्ग-चतुष्टयम्।
नवाङ्कं नाडिवेधादि स्थापकाभ....योर्मिथः ॥२१॥
आयादिचिन्तनं भूमिलक्षणं वास्तुमण्डलम्।
मासनक्षत्रलग्नादिचिन्तनं पूर्वशास्त्रतः ॥२२॥
रात्रौ दिक्साधनं कुर्याद् दीपसूत्रध्रुवेक्षणः।
समे भूमिप्रदेशे तु शङ्कुना दिवसेऽथवा ॥२३॥
नागवास्तुं समालोक्य कुर्यात् खातविधिं सुधीः।
पाषाणान्तं जलान्तं वा ततः कूर्मं निवेशयेत् ॥२४॥
अर्धाङ्गुलो भवेत्कूर्म एकहस्ते सुरालये।
अर्धाङ्गुला ततो वृद्धिः कार्या तिथिकरावधिः ॥२५॥
एकत्रिंशत्करान्तं च तदर्धा वृद्धिरिष्यते।
ततोऽर्द्धादि शताद्धान्तं कूर्मो मन्वङ्गुलो मतः ॥२६॥
चतुर्थांशाधिको ज्येष्ठः कनिष्ठो हीनयोगतः।
सौवर्णो रूप्यजो वापि स्नाप्यः पञ्चामृतेन हि ॥२७॥
तिलैर्यवैस्तथा होमं पूर्णां चैव प्रदापयेत्।
ईशानादग्निकोणाद्या शिलाः स्थाप्याः प्रदक्षिणाः ॥२८॥
मध्ये कूर्मशिला पश्चाद्गीतवादित्रमङ्गलैः।
बलिदानं च नैवेद्यं विविधान्नं घृतप्लुतम् ॥२९॥

देवताभ्यः सुधीर्दद्यात् कूर्मन्यासे शिलासु च।
इति कूर्मस्थापनम्।

सूत्रारम्भो गृहादीनामुत्तरायां करत्रये।
ब्राह्मे पुष्ये मृगे मैत्रे पौष्णवासववारुणे॥३०॥
शिलान्यासस्तु रोहिण्यां श्रवणे हस्तपुष्ययोः।
मृगशीर्षे च रेवत्यामुत्तरात्रितये शुभः॥३१॥
नद्यां सिद्धाश्रमे तीर्थे पुरे ग्रामे च गह्वरे।
वाटीवापितडागादिस्थाने कार्यं सुरालयम्॥३२॥
शक्त्या काष्ठमृत्स्नेष्टकाशैलधातुजरत्नजम्।
देवतायतनं कुर्याद्धर्मार्थकाममोक्षदम्॥३३॥
देवानां स्थापनं पूजा पापहृद्दर्शनादिकम्।
धर्मवृद्धिर्भवेदर्थः कामो मोक्षस्ततो नृणाम्॥३४॥
कोटिघ्नं तृणजे पुण्यं मृन्मये दशसंगुणम्।
ऐष्टके शतकोटिघ्नं शैलेऽनन्तं फलं गृहे॥३५॥
कूर्मसंस्थापने द्वारे पद्मारुण्यायां तु पौरुषे।
घटे ध्वजे प्रतिष्ठायामेवं पुण्याहसप्तकम्॥३६॥
भूम्यारम्भे तथा कूर्मे शिलायां सूत्रपातने।
खुरे द्वारोच्छ्रये कुम्भे पट्टे पद्मशिलासु च॥३७॥
शुकनासे च पुरुषे घण्टायां कलशे तथा।
ध्वजोच्छ्राय च कुर्वीत शान्तिकानि चतुर्दश॥३८॥
एकहस्तादिप्रासादो यावद्धस्तशतार्धकम्।
प्रमाणं कुम्भके मूलनासिके भित्तिबाह्यतः॥३९॥
कुम्भादिस्थावराणां च निर्गमः समसूत्रतः।
पीठस्य निर्गमो बाह्यस्तथैव च्छाद्यकस्य च॥४०॥

त्रिपञ्चसप्तनवभिः फालनाभिर्विभाजयेत् ।
प्रासादमङ्गसंख्या च वारिमार्गान्तरस्थिताः ॥४१॥
फालना कर्णतुल्या स्याद्भद्रं तु द्विगुणं समम् ।
सामान्योऽयं विधिस्तुल्यो हस्ताङ्गुलश्च निर्गमः ॥४२॥
इति श्रीसूत्रधारमण्डनविरचिते प्रासादमण्डने वास्तु-
शास्त्रे मिश्रकलक्षणे प्रथमोऽध्यायः ॥१॥

अथ द्वितीयोऽध्यायः ।

प्रासादानामधिष्ठानं जगती सा निगद्यते
यथा सिंहासनं राज्ञां प्रासादस्य तथैव सा ॥१॥
चतुरस्रायताष्टास्रा वृत्ता वृत्तायता तथा ।
जगती पञ्चधा प्रोक्ता प्रासादस्यानुरूपतः ॥२॥
प्रासादपृथुमाना च त्रिगुणा च चतुर्गुणा ।
क्रमात् पञ्चगुणा प्रोक्ता ज्येष्ठा मध्या कनीयसी ॥३॥
कन्यसे कन्यसा ज्येष्ठा ज्येष्ठे मध्ये च मध्यमा ।
प्रासादे जगती कार्या सुरूपा लक्षणान्विता ॥४॥
रससप्तगुणाख्याता निजे पर्यायसंस्थिता ।
द्वारकायां तु कर्तव्या तथैव पुरुषत्रये ॥५॥
मण्डपानुक्रमेणैव सपादांशेन सार्द्धतः ।
द्विगुणा वायता कार्या स्वहस्तायतने विधिः ॥६॥
त्रिद्व्येकभ्रमसंयुक्ता ज्येष्ठा मध्या कनीयसी ।
उच्छ्रयः स्वत्रिभागेन भ्रमणीनां समुच्छ्रयः ॥७॥
चतुष्कोणैस्तथा सूर्यकोणैर्विंशतिकोणकैः ।
अष्टाविंशतिषट्त्रिंशत्कोणैः स्युः पञ्च फालनाः ॥८॥

प्रासादादर्कहस्तान्तं त्रिशोच्चा विंशती च सा ।
द्वात्रिंशती चतुर्थांशो भूतांशोच्चा शतार्द्धके ॥९॥
एकहस्ते करेणोच्चा साध्यार्धं सा चतुष्करे ।
सूर्यजैनशतार्द्धान्तं क्रमाद्द्वित्रियुगांशकैः॥१०॥
तदुच्छ्रायं भजेत् प्राज्ञस्त्वष्टाविंशतिभिः पदैः ।
त्रिपदो जाड्यकुम्भश्च द्विपदं कणकं तथा ॥११॥
पद्मपत्रसमायुक्ता त्रिपदा सरपट्टिका ।
द्विपदं खुरकं कुर्यात् सप्तभागं च कुम्भकम् ॥१२॥
कलशस्त्रिपदः प्रोक्तो भागेनान्तरपत्रकम् ।
कपोतालिस्त्रिभागे च पुष्पकण्ठो युगांशकैः ॥१३॥
पुष्पको जाड्यकुम्भश्च निर्गमश्चाष्टभिः पदैः।
कर्णेषु च दिशांपालाः प्राच्यादिषु प्रदक्षिणाः ॥१४॥
प्राकारैर्मण्डिता कार्या चतुर्भिर्द्वारमण्डपैः ।
प्राकारैर्जलनिष्कासैः सोपानैस्तोरणादिभिः ॥१५॥
मण्डपाग्रे प्रतोल्यग्रे सोपानं शुण्डिकाग्रतः ।
तोरणं कारयेत् तस्य पट्टं पट्टानुसारतः ॥१६॥
तोरणस्योभयोः स्तंभविस्तरं गर्भमानतः ।
भित्तिगर्भप्रमाणेन तयोर्मध्येऽथवा भवेत् ॥१७॥
वेदिकापीठरूपैश्च शोभाभिर्बहुभिर्युता ।
विचित्रं तोरणं कुर्याद् दोला देवस्य तत्र च ॥१८॥
प्रासादाद्वाहनस्थाने करणीया चतुष्किका ।
एकद्वित्रिचतुष्पञ्चरसमप्तपदान्तरे ॥१९॥
अर्चाया नवमांशे तु पञ्चषट्सप्तभागिकः ।
गुह्यनाभिस्तनान्तं वा त्रिविधो वाहनोदयः ॥२०॥

पादजानुकटीयावदर्चायां वाहनस्य दृक्।
वृषस्य विष्णुभागान्ते सूर्ये व्योमस्तनान्तकम् ॥२१॥
जिनाग्रे समवर्णाग्रं शुकाग्रे गूढमण्डपे।
गूढस्याग्रे चतुष्का स्यात्तदग्रे नृत्यमण्डपम् ॥२२॥
द्विसप्तत्या द्विबाणैर्वा चतुर्विंशतितोऽपिवा।
जिनालये चतुर्दिक्षु सहितं जिनमन्दिरम् ॥२३॥
मण्डपाद् गर्भसूत्रेण वामदक्षिणयोर्दिशोः।
अष्टापदं प्रकर्तव्यं त्रिशाला वा वराणकम् ॥२४॥
अपरे रथशाला च मठं याम्ये प्रकीर्तितम्।
उत्तरे रथरन्ध्रं च प्रोक्तं श्रीविश्वकर्मणा ॥२५॥
जगतीं तादृशीं कुर्यात्प्रासादो यादृशो भवेत्।
भिन्नच्छन्दा न कर्तव्या प्रासादासनसंस्थिता ॥२६॥

इति प्रासादजगती।

अग्रतः पृष्ठतश्चैव वामदक्षिणतोऽपिवा।
प्रासादं कारयेदन्तर्नाभिवेधविवर्जितम् ॥२७॥
लिङ्गाग्रे नतु कर्तव्या अर्चारूपेण देवता ;
प्रभा नष्टा न भोगाय यथा तारा दिवाकरे ॥२८॥
शिवस्याग्रे शिवं कुर्याद् ब्रह्माणं ब्रह्मणोऽग्रतः।
विष्णोरग्रे भवेद्विष्णुर्जिनो जैने रवौ रविः॥२९॥
ब्रह्मविष्णुरेकनाभिर्द्वाभ्यां दोषो न विद्यते।
शिवस्याग्रेऽन्यदेवस्य दृष्टिवेधे महद्भयम् ॥३०॥
प्रसिद्धराजमार्गस्य प्राकारस्यान्तरेऽपिवा।
स्थापयेदन्यदेवांश्च तत्र दोषो न विद्यते ॥३१॥
शिवस्नानोदकं गूढमार्गं चण्डीमुखे क्षिपेत्।

दृष्टं न लङ्घयेत् तत्र हन्ति पुण्यं पुराकृतम् ॥३२॥
एका चण्ड्या रवेः सप्त तिस्रो दद्याद्विनायके ।
चतस्रो वासुदेवस्य शिवस्यार्धा प्रदक्षिणा ॥३३॥
अग्रतो जिनदेवस्य स्तोत्रमन्त्रार्चनादिकम् ।
कुर्यान्न दर्शयेत्पृष्ठं संमुखं द्वारलङ्घनम् ॥३४॥
पूर्वापरामुखद्वारे प्रणालं शुभमुत्तरे ।
इति शास्त्रविचारोऽयमुत्तरेशानदेवताः ॥३५॥
मण्डपे ये स्थिता देवास्तेषां वामे च दक्षिणे ।
प्रणालं कारयेद्धीमान् जगत्यां च चतुर्दिशम् ॥३६॥
पूर्वापरास्यं देवानां कुर्यान्नो दक्षणोत्तरम् ।
ब्रह्मविष्णुशिवार्केन्द्रगुहाः पूर्वापराङ्मुखाः ॥३७॥
नगराभिमुखाः श्रेष्ठा मध्ये बाह्ये च देवताः ।
गणेशो धनदो लक्ष्मीः पुरद्वारे सुखावहाः ॥३८॥
विघ्नेशो भैरवश्चण्डी नकुलीशो ग्रहास्तथा ।
मातरो धनदश्चैव शुभा दक्षिणदिङ्मुखाः ॥३९॥
निर्ऋत्यभिमुखः कार्यो हनुमान वानरेश्वरः ।
अन्ये विदिङ्मुखा देवा न कर्तव्याः कदाचन ॥४०॥

इति देवानां दृष्टिदोषदिग्विभागः ।

सूर्याद्गणेशो विष्णुश्च चण्डी शम्भुः प्रदक्षिणे ॥४१॥
भानोर्गृहे ग्रहास्तस्य गणा द्वादश मूर्तयः ।
श्रीसूर्यः .... ।
गणेशस्य गृहे तद्वच्चण्डी शंभुर्हरी रविः ॥४२॥
मूर्तयो द्वादशान्येऽपि गणाः स्थाप्या हिताश्च ये ।

इति गणेशायतनम् ॥४३॥

विष्णोः प्रदक्षिणेनैव गणेशोऽर्कोऽम्बिका शिवः ।
स्थाप्यास्तस्यावतारस्य मूर्तयो द्वारकां तथा ॥४४॥

इति विष्णोवायतनम् ।

चण्ड्याः शंभुर्गणेशोऽर्को विष्णुःस्थाप्याः प्रदक्षिणाः ।
मातरो मूर्तयो देवा योगिन्यो भैरवादयः ॥४५॥

इति चण्डिकायतनम् ।

शंभोः सूर्यो गणेशश्च चण्डी विष्णुः प्रदक्षिणे ।
स्थाप्याः सर्वे शिवस्थाने दृष्टिवेधविवर्जिताः ॥४६॥

इति शिवायतनम् ।

रुद्रस्त्रिपुरुषो मध्ये रुद्राद्वामगतो हरिः ।
दक्षिणाङ्गे भवेद्ब्रह्मा विपर्यासे भयावहाः ॥४७॥
रुद्रवक्त्रत्रिभागेन हरिरर्द्धे पितामहः ।
तत्तुल्या पार्वतीदेवी सुखदा सर्वकामदा । ४८॥

इति त्रिपुरुषन्यासः ॥

इति प्रासादमण्डने जगतीदृष्टिदोषायतनाधिकारे
द्वितीयोऽध्यायः ॥२॥

अथ तृतीयोऽध्यायः ।

अतिस्थूलातिविस्तीर्णा प्रासादाधारिणी शिला ।
अतीव सुदृढा कार्या इष्टिकाचूर्णवारिभिः ॥१॥
शिलोपरि भवेद्भिट्टमेकहस्ते युगाङ्गुलम् ।
अर्धाङ्गुला भवेद्वृद्धिर्यावद्धस्तशतार्धकम् ॥२॥
अङ्गुलेनांशहीनेन अर्धेनार्धेन च क्रमात् ।

पञ्चदिग् विंशतिर्यावच्छतार्धं च विवर्धयेत् ॥३॥
एकद्वित्रीणि भिट्टानि हीनहीनानि कारयेत् ।
स्वस्वोदयप्रमाणस्य चतुर्थांशेन निर्गमः ॥४॥
इति भिट्टः ।
पीठमर्धं त्रिपादांशैरेवं द्वित्रिकरे गृहे ।
चतुर्हस्ते त्रिसार्द्धांशं पादांशं पञ्चहस्तके ॥५॥
दशविंशतिषट्त्रिंशच्छतार्द्धं हस्तकावधि ।
वृद्धिर्वेदत्रियुग्मैकसंख्या स्यादङ्गुलैः क्रमात् ॥६॥
पञ्चांशहीनमाधिक्यमेकैकं तु त्रिधा पुनः ।
त्रिपञ्चाशत् समुत्सेधे द्वाविंश्यंशनिर्गमे ॥७॥
नवांशो जाड्यकुम्भश्च सप्तांशं कणकं भवेत् ।
सान्तरालं कपोतालिः सप्तांशा ग्रासपट्टिका ॥८॥
सूर्यदिग्वसुभागैश्च गजवाजिनराः क्रमात् ।
वाजिस्थानेऽथवा कार्यं स्वं स्वं देवस्य वाहनम् ॥९॥
पञ्चांशा कणिकाग्रे तु निर्गमो जाड्यकुम्भकम्
त्रिसार्द्धं कणकं सार्धं चतुर्भिर्ग्रासपट्टिका ॥१०॥
कुम्भराश्च नरा वेदा रामयुग्मांशनिर्गमः ।
अन्तरालमधस्तेषामूर्ध्वार्धकर्णयुग्मकम् ॥११॥
गजपीठं विना स्वल्पद्रव्ये पुण्यं महत्तरम् ।
जाड्यकुम्भः कणाली च ग्रासपट्टी तदा भवेत् ॥१२॥
कामदं कणपीठं च जाड्यकुम्भः कणालिका ।
अतिने निर्गमे हीने साधारे निर्गमाधिकम् ॥१३॥
सर्वेषां पीठमाधारः पीठहीनं निराश्रयम् ।
पीठहीनं विनाशाय प्रासादभुवनादिकम् ॥१४॥

इति पीठम्।

हस्तादिपञ्चपर्यन्तं विस्तारेणोदयः समः।
स क्रमान्नवसप्तेषुरामचंद्रौङ्गुलोऽधिकः ॥१५॥
पञ्चादिदशपर्यन्तं त्रिंशद्यावच्छताधकम्।
हस्ते हस्ते क्रमाद्वृद्धिर्मनुसूर्यनवाङ्गुला ॥१६॥
एकहस्तादिपञ्चान्तं पृथुत्वेनोदयः समः।
हस्ते सूर्याङ्गुला वृद्धिर्यावत्त्रिंशत्करावधि ॥१७॥
नवाङ्गुला करे वृद्धिर्यावद्धस्तशतार्द्धकम्।
पीठोर्द्ध उदयश्चैव छाद्यान्ते नागरोधिकम् ॥१८॥
एकविंशत्पञ्चभक्तेः प्रासादस्य समुच्छ्रयः।
पञ्चादिनवभागान्तं पीठस्य पञ्चधोदयः ॥१९॥
वेदवेदेन्दुभक्ते तु छाद्यान्ते पीठमस्तकात्।
खुरकः पञ्चभागं स्याद्विंशतिःकुम्भकस्तथा ॥२०॥
कलशोऽष्टौ द्विसार्धं तु कर्तव्यमन्तरालकम्।
कपोतिकाष्टौ मञ्चची स्यात् कर्तव्या नवभागिका ॥२१
पञ्चत्रिंशत्पदा जङ्घा तिथ्यंशैरुद्गमो भवेत्।
वसुभिर्भरणी कार्या शिरापट्टी दशांशिका ॥२२॥
अष्टांशोर्ध्वा कपोतालिर्द्विसार्धमन्तरालकम्;
छाद्यं त्रयोदशांशोचं दशभागैर्विनिर्गमः ॥२३॥

इति मण्डोवरः।

मेरुमण्डोवरे मञ्ची भरण्यूर्द्धेऽष्टभागिका।
पञ्चविंशतिका जङ्घा उद्गमश्च त्रयोदश॥२४॥
अष्टांशा भरणी शेषं पूर्ववत्कल्पयेत्सुधी।
सप्तभागा भवेन्मञ्ची कूटछाद्यस्य मस्तके ॥२५॥

षोडशांशा पुनर्जङ्घा भरणी सप्तभागिका ।
शिरावटी चतुर्भागा पट्टःस्यात्पञ्चभागिकः ॥२६॥
सूर्यांशैः कूटछाद्यञ्च सर्वकामफलप्रदम् ।
कुम्भकस्य युगांशेन स्थावराणां प्रवेशकः ॥२७॥
इति मेरुमण्डोवरः ।
शिरावट्युद्गमो मञ्ची जङ्घारूपाणि वर्जयेत् ।
अल्पद्रव्ये महत्पुण्यं कथितं विश्वकर्मणा ॥२८॥
इति सामान्यमण्डोवरः ।
पीठतः छाद्यपर्यन्तं सप्तविंशतिभाजिते ।
द्वादशानां खुरादीनां भागसंख्या क्रमेण तु ॥२९॥
स्यादेकवेदसार्धार्द्धं सार्धस्याद्वाष्टभिस्त्रिभिः ।
सार्द्धस्यार्धार्धभागैःस्याद्द्विसार्धैर्द्व्यंशनिर्गमः ॥३०।
इति प्रकारान्तरेण मण्डोवरः ।
पादांशेनैष्टक पञ्चषडंशैः शैलदारुजे ।
साधारऽष्टांशतो भित्तिर्दशांशैर्धातुरत्नजे ॥३१॥
मध्ये युगास्रं भद्रार्द्धा सुभद्रं प्रतिभद्रकम् ।
फालनीयं गर्भगृह दोषदं गर्भमायतम् ॥३२॥
कुम्भकेन समा कुम्भी स्तम्भप्रान्तज उद्गमः ।
भरण्या भरणं शीर्षं कपोताल्या समं भवेत् ॥३३॥
पेटके कटुछाद्यस्य कुर्यात्पट्टस्य पेटकम् ।
सषडंशः सपादस्य सार्धो गर्भस्य विस्तरात् ॥३४॥
बृहद्देवालये पट्टे पेटान्तं हि त्रिधोदयः ।
भवेदष्टाभिरेकांशा कुम्भस्तम्भोऽर्द्धपञ्चभिः ॥३५॥
अर्धेन भरणी शीर्षमेकः पट्टस्तु सार्द्धकम्

व्यासार्धेन करोटं स्याद्र्ध्वं योविषमाश्रुता ॥३६॥

इति गर्भगृहोदयप्रमाणम् ।

मूलकर्णांश्च सूत्रेण कुम्भेनोदुम्बरः समः।
तदधः पञ्चरत्नानि स्थापयेत् शिल्पिपूजनात् ॥३७॥
द्वारन्यासे त्रिभागेन मध्ये मन्दारको भवेत् ।
वृत्तं मन्दारकं कुर्यात् मृणालं पद्मसंयुतम् ॥३८॥
जाड्यकुम्भः कणाली च कीर्तिवक्त्र द्वयं तथा।
उदुम्बरस्य पार्श्वे च शाखायां स्तलरूपकम् ॥३९॥
कुम्भस्यार्धे त्रिभागे वा पादहीन उदुम्बरः।
तद्द्वयं कणकं मध्ये पीठके बाह्यभूमिका । ४०॥

इति उदुम्बरः।

खुरकेन समं कुर्यादर्धचन्द्रस्य चोच्छ्रितिः।
द्वारव्याससमं दैर्घ्यं निर्गमञ्च तदर्धतः ॥४१॥
द्विभागमर्धचंद्रं च भागेन द्वौ गगारकौ।
शङ्खपत्रसमायुक्तं पद्माकारैरलङ्कृतम् ॥४२॥

इति अर्धचन्द्रः ।

एकहस्ते तु प्रासादे द्वारं स्यात्षोडशाङ्गुलम्।
षोडशाङ्गुलिका वृद्धिर्यावद्धस्तचतुष्टयम् ॥४३॥
अष्टहस्तान्तकं यावद्दीर्घे वृद्धिर्गुणाङ्गुला।
द्व्यङ्गुलमतिहस्तञ्च यावद्धस्तशतार्धकम् ॥४४॥
यावद् वाहनपर्यङ्कद्वारं प्रासादसद्मनाम् ।
दैर्घ्यार्धेन पृथुत्वे स्याच्छोभनं तत्कलाधिकम् ॥४५॥

इति नागरप्रासादद्वारम् ।

एकहस्ते सुरागारे द्वारं मूर्त्यङ्गुलोदयम् ।

सूर्याङ्गुला प्रतिकरं वृद्धिःपञ्चकरावधिः ॥४६॥
पञ्चाङ्गुला च सप्तान्त द्व्यङ्गुला तु शतार्धके ।
नवान्तं स्याद्युगाङ्गुलं वृद्धिः कार्या करं प्रति॥४७॥
इति भूमिजे द्वारम् ।
प्रासादे चैकहस्ते तु द्वारं कुर्याद्दशाङ्गुलम् ।
रसहस्तान्तकं यावत् तावता वृद्धिरिष्यते ॥४८॥
पञ्चाङ्गुलाद्दशान्तं च द्व्यङ्गुलं वा शतार्धकम् ।
... ... ॥४९॥
इति द्राविडे द्वारम् ।
विमाने भौमजं मानं विराटेषु तथैव च ।
मिश्रके लतिने चैव प्रशस्तं नागरोद्भवम् ॥५०॥
विमाननगरछन्दे कुर्यात् विमानपुष्पके ।
सिंहावलोकने द्वारं नागरं शोभनं मतम् ॥५१॥
वलभ्यां भौमजं मानं फासाकारेषु द्राविडे ।
धातुजे रत्नजे चैव दारुजे च रथारुहे ॥५२॥
इति द्वारप्रमाणम् ।
नवशाखं महेशस्य देवानां सप्तशाखिकम् ।
पञ्चशाखं सार्वभौमे त्रिशाखं मण्डलेश्वरे ॥५३॥
एकशाखं भवेद्द्वारं वैश्ये शूद्रे द्विजे सदा ।
समशाखं धूमाय...श्वानरासभवायसे ॥५४॥
त्रिपञ्चसप्तनन्दाङ्के शाखाःस्युरङ्गतुल्यकाः ।
हीनशाखं न कर्तव्यमधिकाद्धं सुखावहम् ॥५५॥
अङ्गुल सार्धमर्द्धञ्च कुर्याद्धीनं तथाधिकम् ।
आपद्दोषविशुद्धयर्थं ह्रासो वृद्धिर्न दुष्यति॥५६॥

चतुर्भागाङ्कितं कुर्यात् शाखाविस्तारमानकम् ।
मध्ये द्विभागिकं कुर्यात् स्तम्भं पुरुषसंज्ञकम् ॥५७॥
त्रिसंज्ञका भवेत् शाखा पार्श्वतो भागभागिका।
निर्गमे चैकभागेन रूपस्तम्भः प्रशस्यते ॥५८॥
एकांशं सार्द्धभागश्च पादोनद्वयमेव च ।
द्विभागं निर्गमे कुर्यात् स्तम्भं द्रव्यानुसारतः ॥५९॥
पेटके विस्तरं कार्यं प्रवेशस्तु युगांशकम् ।
कोणिका स्तम्भमध्ये तु भूषणार्था हि पार्श्वतः ॥६०॥
द्वारदैर्घ्यचतुर्थांशे द्वारपालो विधीयते ।
स्तम्भं शाखादिकं शेषे त्रिशाखावद्विभाजयेत् ॥६१॥

इति त्रिशाखम् ।

पत्रशाखा च गन्धर्वा रूपस्तम्भतृतीयके ।
चतुर्थी स्वल्पशाखा च सिंहशाखा च पञ्चमी ॥६२॥

इति पञ्चशाखा ।

प्रथमा पत्रशाखा च गन्धर्वा रूपशाखिका ।
चतुर्थी स्तम्भशाखा च रूपशाखा च पञ्चमी ॥६३॥
षष्ठी तु शल्यशाखा च सिंहशाखा च सप्तमी ;
स्तम्भशाखा भवेन्मध्ये रूपशाखाग्रसूत्रतः ॥६४॥

इति सप्त शाखाः ।

पत्रगन्धर्वसंज्ञा च रूपस्तम्भतृतीयके ।
चतुर्थी शल्यशाखा च गन्धर्वा त्वथ पञ्चमी ॥६५॥
रूपस्तम्भस्तथा षष्ठी रूपशाखा ततःपरा ।
शल्यशाखा च सिंहाख्या मूलकर्णेन मिता ॥६६॥
यस्य देवस्य या मूर्तिः सैव कार्योत्तराङ्गके ।

शाखायाञ्च परीवारो गणेशश्चोत्तराङ्गके ॥६७॥

इति नवशाखा ।

इति प्रासादमण्डने वास्तुशास्त्रे पीठमण्डोवरगर्भगृह उदुम्बरप्रमाणं तृतीयोऽध्यायः ॥३॥

अथ चतुर्थोऽध्यायः

द्वारोच्छ्रायोऽष्टनवधा भागमेकं परित्यजेत् ।
शेषे त्र्यंशे द्विभागार्चा त्र्यंशोना द्वारतोऽथवा ॥१॥
द्वारदैर्घ्ये तु तिथ्यंशो तिथिशक्रकलांशकैः ।
ऊर्ध्वार्चा आसनस्था च मनुविश्वार्कभागतः ॥२॥
चतुरस्रीकृते क्षेत्रे दशभागविभाजिते ।
भित्तिर्द्विभागा कर्तव्या षड्भागं गर्भमन्दिरम् ॥३॥
तृतीयांशेन गर्भस्य प्रासादे प्रतिमोत्तमा ।
मध्यमा स्वदशांशोना पञ्चांशोना कनीयसी ॥४॥
आयभागैर्भजेद्द्वारमष्टमं तूर्ध्वतस्त्यजेत् ।
सप्तमे सप्तमे दृष्टिर्वृषे सिंहे ध्वजे शुभा ॥५॥
षष्ठभागस्य पञ्चांशो लक्ष्मीनारायणादिदृक् ।
शयनार्चेशलिङ्गानि द्वारार्धं न व्यतिक्रमेत् ॥६॥
पट्टाधो यक्षभूताद्याः पट्टाग्रे सर्वदेवताः ।
तदग्रे वैष्णवं ब्राह्मं मध्ये लिङ्गं शिवस्य च ॥७॥

इति प्रतिमाप्रमाणदृष्टिपदस्थापनम् ।

छाद्यस्योर्ध्वे प्रहारः स्यात् शृङ्गे शृङ्गे तथैव च
प्रासादशृङ्गशृङ्गेषु अधोभागे तु छाद्यकम् ॥८॥

छाद्यं भागद्वयं सार्द्धं सार्द्धभागं च पालवम् ।
मुण्डलीकं भागमेकं भागेन तिलकस्तथा ॥९॥
मूलकर्णे रथादौ वा एकद्वित्रिक्रमान्न्यसेत् ।
निराधारे मूलभित्तौ साधारे भ्रमभित्तिषु ॥१०॥
उरुश्रृङ्गाणि भद्रे स्युरेकादिग्रहसंख्यया ।
त्रयोदशोर्द्ध्वं सप्तार्द्धं लुप्तानि चोरुश्रृङ्गकैः ॥११॥
रेखामूलेन दिग्भागं कुर्यादग्रे षडंशकम् ।
षड्बाह्ये दोषदं प्रोक्तं पञ्चमध्ये न शोभनम् ॥१२॥
सपादं शिखरं कार्यं सकर्णं शिखरोदयम् ।
सपादकर्णयोर्मध्ये उदये पञ्चविंशतिः ॥१३॥
प्रोक्ता रेखा कलाभेदैर्वलगैः पञ्चविंशतिः ।
पञ्चादिनवयुग्मान्तं खण्डानि तेष्वनुक्रमात् ॥१४॥
अंशवृद्ध्या कलाः कार्या दैर्घ्ये स्कन्धेऽपि तत्समाः ।
अष्टादावष्टषष्ठ्यन्तं चतुर्वृद्ध्या तु षोडश ॥१५॥
दैर्घ्यतुल्याः कलाः स्कन्धे एकहीनास्तु षोडश ।
ऊर्ध्वा अष्टदशांशाः स्युस्तिर्यक्षोडश एवच ॥१६॥
चक्रेऽस्मिन्संभवन्त्येव रेखाणां षट्शतद्वयम् ।
त्रिखंडात् खण्डवृद्धिश्च यावदष्टादशैव हि ॥१७॥
एकैकांशे कलाष्टौ च समाचारस्तु षोडश ।
द्वितीयप्रथमे खण्डे कलाष्टौ द्वितीये नव ॥१८॥
तृतीये दशखंडेषु शेषेषूर्ध्वेष्वयं क्रमः ।
अष्टदिक्तु सुभागैश्च त्रिखण्डा तृतीया भवेत् ॥१९॥
अनेन क्रमयोगेन कोष्ठानङ्कैः प्रपूरयेत् ।
रेखाणां जायते संख्या षट्पञ्चाशच्छतद्वयम् ॥२०॥

सव्यासं शिखरं कार्यं सकर्णं शिखरोदयम् ।
व्यासस्य कर्णयोर्मध्ये रेखाः स्युः पञ्चविंशतिः ॥२१॥
विंशद्भिर्विभजेद्भागैः शिलातः कलशान्तकम् ।
मण्डो वरोऽष्टसार्द्धाष्टनवांशैः शिखरोदयम् ॥२२॥
रेखामूलस्य विस्तारे पद्मकोशं समालिखेत् ।
चतुर्गुणेन सूत्रेण सपादः शिखरोदयः ॥२३॥
स्कन्धकोशान्तर सप्तभक्त ग्रीवात्रिभागतः ।
सार्धमामलसारश्च पद्मपत्रन्तु सार्द्धकम् ॥२४॥
त्रिभाग उच्चकलशो द्विभागं तस्य विस्तरम् ।
प्रासादस्याष्टमांशेन पृथुत्वकलशाण्डके ॥२५॥
छाद्यतः स्कन्धपर्यन्तमेकविंशतिभाजिते ।
अङ्कदिग्रुद्रसूर्यांशैर्विश्वांशैस्तस्य चोच्छ्रयः॥२६॥
शुकनासस्य संस्थानं छाद्योर्ध्वे प्रञ्चधा मतम् ।
एकत्रिपञ्चसप्ताङ्कसिंहस्थानानि कल्पयेत् ॥२७॥
द्वारस्य दक्षिणे वामे कपिली षड्विधा मता ।
तदूर्ध्वे शुकनासा स्यात् सैव प्रासादनासिका ॥२८॥
प्रासादो दशभागश्च द्वित्रिवेदांशसंमिता ।
प्रासादेनार्द्धपादेन त्रिभागनाथ निर्मिता ॥२९॥
शृङ्गोरुशृङ्गप्रत्यङ्गैः वर्णाण्डकान् गणयेत्सुधीः ।
तवाङ्गं तिलकं कर्णे कुर्यात्प्रासादभूषणम् ॥३०॥
दशांशे शिखरेमूले अग्रे तत्र नवांशके
सार्धांशकौ रथौ कोणौ द्वौशेषं भद्रमिष्यते ॥३१॥
रथयोरुभयोर्मध्ये वृत्तमामलसारकम् ।

उत्सेधो विस्तरार्धेन चतुर्भागविभाजयेत् ॥३२॥
ग्रीवा चामलसारश्च पादोनश्च सपादकम् ।
चन्द्रिकाभागमानेन भागेनामलसारिका ॥३३॥
घृतपात्रं न्यसेन्मध्ये ताम्रपात्रं सुवर्णजम् ।
सौवर्णं पुरुषं तत्र तुली?पर्यङ्कशायिनम् ॥३४॥
प्रमाणं पुरुषं सार्द्धाङ्गुलं कुर्यात्करं प्रति ।
त्रिपताकं करे वामे हृदिस्थं दक्षिण करम् । ३५॥
प्रासादपृष्ठदेशे तु दक्षिणे प्रतिरथके ।
ध्वजाधारस्तु कर्तव्य ईशाने नैर्ऋतेऽथवा ॥३६॥

इति प्रासादस्योर्द्ध लक्षणम्।

क्षीरार्णवसमुत्पन्नं प्रासादस्याग्रजातकम् ।
माङ्गल्येषु च सर्वेषु कलशं स्थापयेद्बुधः ॥३७॥
पूर्वोक्तमानतो ज्येष्ठः षोडशांशाधिको भवेत्।
ग्रीवापीठं भवेद्भागं त्रिभागेनाण्डकं तथा ॥३८॥
कर्णिकाभागतुल्ये च त्रिभागं बीजपूरकम्।
एकांशमग्रे द्वौ मूले वह्निवेदांशकर्णिके ॥३९॥
ग्रीवा द्वौ पीठमर्धं द्वौ षड्भागं विस्तराण्डकम् ।

इति कलशः।

दण्डस्तत्तृतीयांशेन शिलान्तकलशान्तकम् ॥४०॥
मध्योऽष्टांशेन हीनोऽसौ ज्येष्ठपादोऽन्यकन्यसः।
प्रासादपृथुमानेन दण्डो ज्येष्ठः प्रकीर्तितः ॥४१॥
मध्यो हीनो दशांशेन पञ्चमांशेन कन्यसः ।
एकहस्ते तु प्रासादे दण्डः पादोनमङ्गुलम् ॥४२॥
कुर्यादर्धाङ्गुलं वृद्धिर्यावत्पञ्चदशाहृतम् ।

सुवृत्तः सारदारुश्च ग्रन्थिकण्टकवर्जितः ॥४३॥
पर्वभिर्विषमैः कार्यःसमग्रन्थिः सुखावहः ।
दण्डदीर्घषडंशेन मर्कट्य ? र्धेनविस्तरः ॥४४॥
अर्धचन्द्राकृतिः पार्श्वे घण्ट द्रू कलशास्तथा ।
ध्वजो दण्डप्रमाणेन धैर्घ्येऽष्टांशेन विस्तरे ॥४५॥
नानावस्त्रविचित्राणि त्रिपञ्चाग्रशिखोपमा ।
पुरे च नगरे कोट्टे रथे राजगृहे तथा ॥४६॥
वापीकूपतडागेषु ध्वजाः कार्याः सुशोभनाः ।
निष्पन्नं शिखरं दृष्ट्वा ध्वजहीनं न कारयेत् ॥४७॥
असुरा वासमिच्छन्ति ध्वजहीने सुरालये ।
ध्वजोच्छ्रायेण तुष्यन्ति देवाश्च पितरस्तथा ॥४८॥
दशाश्वमेधिकं पुण्यं सर्वतीर्थधरादिकम् ।
पञ्चशत्पूर्वतः पश्चादात्मानञ्च तथाधिकम् ॥४९॥
शतमेकोत्तरं सोऽपि तारयेन्नरकार्णवात

इति ध्वजलक्षणपुण्याधिकारः ।

इति प्रतिमादृष्टिपदस्थानशिखरध्वज - कलशलक्षणाधिकारश्चतुर्थोऽध्यायः ॥४॥

अथ पंचमोऽध्यायः।

नानाविधमिदं विश्व विचित्रं येन सूत्रितम् ।
सूत्रधारः स एव स्यात् सर्वेषां पालनक्षमः ॥१॥
न्यूनाधिकं प्रसिद्धश्च यत्किञ्चिन्मण्डनोदितम् ।
विश्वकर्मप्रसादेन शिल्पिभिर्मन्यतांवचः ॥२॥

चतुर्भागं समारभ्य यावत्सूर्योत्तरशतम् ।
भागसंख्येति विख्याता फालना कर्णबाह्यतः ॥३॥
अष्टोत्तरशतं भेदा अंशवृद्ध्या भवन्ति ते ।
समांशैर्विषमैः कार्या नन्दभेदैश्च फालनाः ॥४॥
एकस्यापि तलस्योर्ध्वे शिखराणि बहून्यपि ।
नामानि जातयस्तेषामूर्ध्वमार्गानुसारतः ॥५॥
दशहस्तादधो नास्ति प्रासादो भ्रमसंयुतः ।
नवाष्टदशभागेन भ्रमो भित्तिर्विधीयते ॥६॥
वैराज्यश्चतुरस्रस्तु चतुर्द्वारचतुष्किकः ।
प्रासादो ब्रह्मणः प्रोक्तो धीमता विश्वकर्मणा ॥७॥
सपादं शिखरं कार्यं घण्टाकुलिशभूषितम् ।
चतुर्भिः शुकनासैस्तु सिंहकर्णैर्विराजितम् ॥८॥
एकद्वारं भवेत्पूर्वं द्विद्वारं पूर्वपश्चिमम् ।
त्रिद्वारे मध्यजं द्वारं दक्षिणास्यं विवर्जयेत् ॥९॥
चतुर्द्वारं चतुर्दिक्षु शिवब्रह्मजिनालये ।
होमशाला चतुर्द्वारा क्वचिद्राजगृहे तथा ॥१०॥
वैराज्यादिसमुत्पन्नाः प्रासादा ब्रह्मणार्चिताः ।
एकत्रिपञ्चसप्ताङ्कशाखान्तैः पञ्चविंशतिः ॥११॥
चतुर्भक्ते भवेत् कोणो भागो भद्रं द्विभागिकम् ।
भागार्धं निर्गमं भद्रे प्रकुर्यान्मुखभद्रकम् ॥१२॥
शृङ्गमेकं भवेत् कर्णे द्वे द्वे भद्रे च नन्दनम् ।

इति नन्दनम् । तथाचोक्तम्

मुखभद्रे यतिभद्रमुद्गमो रथिकोपरि ॥१३॥

कर्णशृङ्गे सिंहकर्णं सिंहनामा स उच्यते ।
देवानां तु प्रकर्तव्यं सिंहस्तत्रैव शाश्वतः ॥१४॥
तुष्यते गिरिजा तस्य सौभाग्यधनपुत्रकैः ।
रथिकां सिंहकर्णं च भद्रे शाङ्कं च सिंहकः ॥१५॥
इति सिंहः ।
कर्णे शृङ्गं तु पञ्चाण्डकश्रीनन्दन उच्यते ।
अगा इति षड्भागैश्च चतुरस्रं विभाजयेत् ॥१६॥
कर्णं प्रतिरथं कुर्याद्भद्रार्द्धं भागभागिकम् ।
समनिर्गममस्माच्च भद्रं भागार्द्धनिर्गमः ॥१७॥
द्वे द्वे कर्णे तथा भद्रे चैकं च प्रतिरथ्यकम् ।
मन्दिरं तृतीयं भद्रमलयोर्भद्रजं त्यजेत् ॥१८॥
प्रत्येकं तिलकं कुर्यात् प्रतिरथ्ये विमानकः ।
भद्रोरुशृङ्गवैशालप्रतिरथ्ये सुभूषणः ॥१९॥
इति पञ्चाङ्गाः पञ्च ।
चतुरस्रेऽष्टभिर्भक्ते कर्णे प्रतिरथं रथम् ।
भद्रार्धं भागभागं च भागार्धेन विनिर्गमम् ॥२०॥
वारिमार्गान्तरयुता रथाश्च तुल्यनिर्गमाः ।
शृङ्गयुग्मे च तिलकं कर्णे द्वे प्रतिरथ्यकः ॥२१॥
एकं चोपरथे भद्रे त्रीणि त्रित्रिचतुर्दिशम् ।
शिखरं पञ्चविस्तारं महेन्द्रो राज्यदो नृणाम् ॥२२॥
कर्णे शृङ्गत्रयं शेषं पूर्ववद्रत्न शीर्षकम् ।
त्यक्त्वैकशृङ्गमद्रस्य मतालम्बं न कारयेत् ॥२३॥
मस्तके तस्य चण्डावस्य शृङ्गयुग्मं प्रदापयेत् ।
सितशृङ्गस्तदा नाम ईश्वरस्य सदा प्रियः ॥२४॥

तिलकं चोपरथ्य तु भूधरो नाम नामतः।
छाद्यशृङ्गे तु तिलकं नाम्ना भुवनमण्डनः ॥२४॥
शृङ्गद्वयं चोपरथे तिलकं कारयेत् सुधीः।
त्रैलोक्यविजयो भद्रशृङ्गे न क्षितिवल्लभः ॥२५॥
इति सप्ताङ्गः।
दशभागकृते क्षेत्रे भद्रार्धे भागमानतः।
त्र्यंप्रतिरथः कर्णे भागो भागसमो भवेत् ॥२६॥
कर्णे प्रतिरथे भद्रे द्वे द्वे शृङ्गे प्रकारयेत्।
रथोपरथे तिलकं प्रत्यङ्गं च रथोपरि ॥२७॥
मतालम्बयुतं भद्रं प्रासादोऽयं महीधरः।
भद्रे शृंगं तृतीयं च कैलासो नाम नामतः ॥२८॥
भद्रं त्यक्त्वा रथे शृङ्गं नवमङ्गल उच्यते।
तथा भद्रे पुनर्दद्यात् तदासौ गन्धमादनः ॥२९॥
भद्रं त्यक्त्वा चोपरथे शृङ्गं सर्वाङ्गसुन्दरः।
भद्रे दद्यात् पुनः शृङ्गं विजयानन्द उच्यते ॥३०॥
मतालम्बयुतं भद्रमुरुशृङ्गं परित्यजेत्।
शृङ्गद्वयं च च्छाद्योर्ध्वे सर्वाङ्गतिलकस्तदा ॥३१॥
उरुशृङ्गं ततो दद्यान्मतालम्बसमन्वितम्।
महाभोगस्तदा नाम सर्वकामफलप्रदः ॥३२॥
कर्णे प्रतिरथे रथे चैकं तूपरथादिषु।
मेरुश्चापि समाख्यातः सर्वदेवेषु पूजितः ॥३३॥
प्रदक्षिणात्रये स्वर्णमेरौ पुंसां च यत् फलम्।
इष्टकाशैलजामेरुतत्फलं प्रदक्षिणाकृते ॥३४॥
वैराज्यप्रमुखा येऽत्र नागरा ब्रह्मणोदिताः।

इति वैराज्यादिप्रासादपञ्चविंशत्यधिकारे
पञ्चमोऽध्यायः ५ ॥

अथ षष्ठोऽध्यायः

केसरी सर्वतोभद्रो नन्दनो नन्दिशालकः ।
नन्दीशो मन्दरश्चैव श्रीवृत्तश्चामृतोद्भवः ॥१॥
हिमवान् हेमकूटश्च कैलासः पृथिवीजयः ।
इन्द्रनीलो महानीलो भूधरो रत्नकूटकः ॥२॥
वैदूर्यः पद्मरागश्च वज्रको मुकुटोज्ज्वलः ।
ऐरावतो राजहंसो गरुडो वृषभध्वजः ॥३॥
मेरुः प्रासादराजश्च देवानामालयो हि सः ।
ब्रह्मविष्णुशिवार्काणामन्येषां न कदाचन ॥४॥
आद्यः पञ्चाण्डको ज्ञेयः किसरी नाम नामतः ।
चतुर्णां क्रमतो वृद्धिर्यावदेकोत्तरं शतम् ॥५॥
क्षेत्रेऽष्टांशे विभक्ते तु कर्णो भागद्वयं भवेत् ।
भद्रार्धं कर्णतुल्यं च भागेनैकेन निर्गमः ॥६॥
दशांशे सार्धभागं च भद्रार्धं च प्रतिरथे ।
कर्णो द्विभागः सूर्यांशे भद्रार्धं प्रतिरथके ॥७॥
चतुर्दशविभक्ते तु कर्णोर्ध्वं द्वादशांशवत् ।
भद्रपार्श्वद्वये कार्या भागभागेन नन्दिका ॥८॥
षोडशांशे प्रकर्तव्यः कर्णः प्रतिरथेऽन्तरे ।
कोणिका भागतुल्या च शेषं चतुर्दशांशवत् ॥९॥
चतुरस्रीकृते क्षेत्रे विंशत्यंशविभाजिते ।

कर्णौ द्विभागः कोणी च सार्द्धांशा पृथुविस्तरे ॥१०॥
द्विभागस्तु प्रतिरथो नन्दिका सार्द्धभागिका।
भद्रनंदी भवेद्भागा भद्रार्धं युग्मभागिकम् ॥११॥
द्वाविंशत्यंशके नंदी भागैका भद्रपार्श्वयोः।
त्रयः प्रतिरथाः कर्णे भद्रार्धं च द्विभागिकम् ॥१२॥
एकद्वित्रि त्रिकं त्रीणि वेदाश्चत्वारि पञ्च च।
तलेषु क्रमतोऽष्टासु केऽप्याहुः शिखराणि हि ॥१३॥
अष्टादशांशभद्रस्य पाश्व द्वे द्वे च नन्दिके।
कर्तव्यैर्भागभागैश्च शेषं स्यात्षोडशांशवत् ॥१४॥
शिखरं त्वेकवेदैकषट्त्रिवेदयुगद्वयम्।
तलेषु क्रमतः प्रोक्तो मूलसूत्रे पराजिते ॥१५॥
तलेष्वष्टासु विहिताः प्रासादाः पञ्चविंशतिः।
त्रयस्त्रयः क्रमेणैव चत्वारश्चाष्टमे तले ॥१६॥
त्रीणि त्रीणि स्वकीयानि द्वे द्वे परः परस्य च।
शिखराणि विधेयानि विश्वकर्मवचो यथा ॥१७॥
द्वित्र्येकषट्त्रयोऽष्टादितलेषु पञ्चसु क्रमात्।
सप्तैव सप्तमे षष्ठे शिरांसि त्रीणि चाष्टमे ॥१८॥
भेदाः पञ्चाशदेकैकं प्रोक्ताः श्रीविश्वकर्मणा।
तेनैकस्मिंस्तलेऽपि स्युः शिखराणि बहून्यपि ॥१९॥
रथिकां सिंहकर्णं च भद्रे कुर्याद्गवाक्षकान्।
प्रत्यङ्गैस्तिलकाद्यैश्च शोभितं सुरमन्दिरम् ॥२०॥
प्रासादाः केसरिमुखाः सर्वदेवेषु पूजिताः।
पुरग्रामेः प्रजादीनां कर्तुः कल्याणकारकाः ॥२१॥
इति केसर्यादिप्रासादाः पञ्चविंशतिः।

षट्त्रिंशत्करतोऽधस्ताद्यावद्धस्तचतुष्टयम् ।
विना भ्रमैर्निराधाराः कर्तव्याः शान्तिमिच्छता ॥२२॥
वास्तोः पञ्चविधं क्षेत्रं चतुरस्रमथायतम् ।
वृत्तं वृत्तायत चैवाष्टास्रं देवालयादिषु ॥२३॥
विस्तारे तु चतुर्भागमायामे पञ्चभागिकम् ।
ऊर्ध्वंऽतिकलशानां कुर्यात् पृष्ठयग्रे सिंहकर्णकम् ॥२४॥
वृत्तायतं प्रकर्तव्यं व्यासार्धं वामदक्षिणे ।
कर्णयोर्भ्रामयेत् वृत्तं वृत्तं भद्राणि चाष्ट हि ॥२५॥
प्रासादो वर्तुलाष्टास्रः प्रायेणैकाण्डकः शुभः ।
कर्णौ वा श्रेणयोऽण्डानां मण्डपं तत्स्वरूपकम् ॥२६॥
इति पञ्च क्षेत्राणि ।
विचित्रैरुपसंघातैर्भद्रैर्गवाक्षभूषितैः ।
वितानफालनाशृङ्गैरनेकैर्नागरा मताः ॥२७॥
पीठोपरि भवेद्वेदी पीठानि त्रीणि पञ्च च ।
पीठतो द्राविडे रेखा लताशृङ्गादिसंयुता ॥२८॥
भूमिकोपरि भूमिश्च ह्रस्वार्के नवान्तकम् ।
विभक्तिदलसंयुक्ता मूर्ध्नि शृङ्गेण भूमिजा ॥२९॥
शृङ्गेणैकेन लतिता श्रीवत्सा वारिसंयुता ।
नागरा भ्रमसंयुक्ताः साधारास्ते प्रकीर्तिताः ॥३०॥
इति प्रासादानां जातयः ।
पञ्चहस्तो भवेन्मेरुरेकोत्तरशताण्डकः ।
भेदाः पञ्चोनपञ्चाशत्करवृद्ध्या भवन्ति ते ॥३१॥
हस्ते हस्ते भवेत् वृद्धिर्दण्डकानां च विंशतिः ।
एकोत्तरसहस्रं स्यात् शृङ्गाणां च शतार्द्धके ॥३२॥

केसरिप्रमुखाः कर्णे विमानं चोरुशृङ्गकम् ।
तथैव मूलशिखरं पञ्चभूमिविमानकम्॥ ३३॥
विमानं नागरा जातिस्तदा प्राज्ञैरुदाहृता ।
एकशृङ्गेषु शृङ्गाणि संभवन्ति बहून्यपि ॥ ३४॥
श्रीमेरुपृष्ठभागः स्यादेकोत्तरशताण्डकः ।
हिमशीर्षो दशांशः स्यात् युगसार्धशताण्डके॥ ३५॥
भागैर्द्वादशभिर्युक्तः सार्द्धद्वित्सेन?संयुतः ।
सुरवल्लभनामा तु प्रोक्तः श्रीविश्वकर्मणा । ३६॥
कोणे द्विभाग एकांशा कोणी सार्द्धप्रतीरथः ।
अर्धांशा नन्दिका भद्रे साधभागेन संमितम् ॥ ३७॥
त्रिशतं पञ्चसप्तत्याधिकं यस्याण्डकानि हि ।
भक्तश्चतुर्दशांशैस्तु नाम्ना भुवनमण्डनः ॥ ३८॥
कोणकोणी प्रतिरथो नन्दी भद्रार्धमेवच ।
द्व्येकद्व्यर्द्धांशे सार्द्धांशैश्चतुर्दशविभाजिते ॥ ३९॥
बाणैकवेदयुग्मांशा वेदाः कर्णादिभागतः ।
रत्नशीर्षो भवेन्मेरुः पञ्चाशतैकशृङ्गकैः ॥ ४०॥
गुणैकयुग्मचन्द्रादौ पुराणांशविभाजिते ।
किरणोद्भवमेरुश्च सपादः षट्शताण्डकः ॥ ४१॥
रामचन्द्रद्वियुग्मांशनेत्रे विंशतिभाजिते ।
नाम्ना कमलहंसः स्यात्सार्द्धसप्तशताण्डकः ॥ ४२॥
भागैकनिर्गमा भित्तिर्वेदभार्द्धत्रिसार्धकैः ।
द्वाभ्यां तैः स्वर्णकेतुश्च पञ्चसप्ताष्टशृङ्गकैः ॥ ४३॥
संभ्रमो भ्रमहीनश्च महामेरुभ्रमद्वयम् ।
साधारेषु प्रकर्तव्यं भद्रे भद्राविलोकनम् ॥ ४४॥

वेदैकरामयुग्मांशनेत्रे जिनविभाजिते ।
वृषभध्वजमेरुश्च सैकाण्डकसहस्रवान् ॥४५॥
संभ्रमो भ्रमहीनश्च महामेरुभ्रमद्वयम् ।
साधारेषु प्रकर्तव्यं भद्रे भद्राविलोकनम् ॥४६॥
राज्ञश्च प्रथमो मेरुस्ततो हीनोऽन्यवर्णजः ।
विना राज्ञोऽन्यवर्णेन कृते मेरौ महाभयम् ॥४७॥
इति नवमेरुलक्षणम् ।
इति केसर्यादिप्रासादजातिलक्षणे पञ्चचत्वारिंशन्मेरु
लक्षणे षष्ठोऽध्यायः ॥६॥

अथ सप्तमोऽध्यायः ।

रत्नगर्भाङ्कितं सूर्यचन्द्रताराविताकम् ।
विचित्रं मण्डपं येन कृतं तस्मै नमः सदा ॥१॥
कर्णगूढो विलोक्यः स्यादेकत्रिद्वारसंयुताः ।
प्रासादाग्रे प्रकर्तव्याः सर्वदेवेषु मण्डपाः ॥२॥
गूढस्त्रीकास्तथा नृत्यक्रमेण मण्डपास्त्रयः ।
जिनस्याग्रे प्रकर्तव्याः सर्वेषां तु बलाणकम् ॥३॥
समं सपादं प्रासादात्सार्द्धपादोनतद्द्वयम् ।
द्विगुणं वा प्रकर्तव्याः मण्डपाः पञ्चधा मताः ॥४॥
समं सपादं पञ्चाशत्पर्यन्तं दशहस्तकम् ।
दशान्तं पञ्चतः सार्द्धद्विपादोनं चतुष्करे ॥५॥
त्रिहस्ते द्विगुणं द्व्येकहस्ते कुर्याच्चतुष्किकाम् ।
प्रायेण मण्डपं सार्द्धं द्विगुणं मत्तवालिन्दकैः ॥६॥

मण्डपे स्तंभपट्टार्थमध्यपट्टानुसारतः ।
शुकनासा समा घण्टा न्यूना श्रेष्ठा नचाधिका ॥७॥
मुखमण्डपसङ्घातो पदा भित्त्यन्तरे भवेत्
न दोषःस्तंभपादाद्यैः समं वा विषमं तलम् ॥८॥
नवाष्टदशभागेषु त्रिभिश्चन्द्रावलोकनम् ।
हस्तकमङ्गुलोनं वा तदूर्ध्वं मत्तवारणम् ॥९॥
सार्द्धं पञ्चांशकैर्भक्तैः सपादं राजसेनकम् ।
सपादं ऽयंशका वेदिर्भागेनासनपेटकम् ॥१०॥
तदूर्ध्वं सप्तसार्द्धांशे यावत्पट्टस्य पेटकम् ।
सार्द्धपञ्चांशकैः स्तंभः पादोनं भरणं भवेत् ॥११॥
भागार्धं भरणं चापि सपादं सार्धतः शरः ।
पादो द्विभागस्तस्योर्द्धं कर्तव्यश्छाद्यकोदयः ॥१२॥
त्रिभागे तलतः श्छाद्यं तत्पेटं पट्टपेटके ।
अर्धांशोर्द्धा कपोतालिर्द्विभागे पट्टविस्तरे ॥१३॥
प्रासाददशरुद्रांशः भागेन स्तंभविस्तरः ।
वेदाष्टरविंविशत्या कर्णो वृत्तस्तु पञ्चधा ॥१४॥
द्वाराग्रे स्तम्भवेद्याद्या भागग्रीवो मण्डपो भवेत् ।
द्विद्विस्तंम्भविवृद्ध्या च षोडशोऽयं प्रकीर्तितः ॥१५॥
भित्तिः प्रासादवद्गेहे मण्डपेऽष्टविधेषु च ।
चतुरस्त्रशुभस्तस्य तथा प्रतिरथान्वितः ॥१६॥
मुखभद्रयुतो वापि द्वित्रिप्रतिरथैर्युतः ।
कर्णोदकान्तरेणाथ भद्रोदकविभूषितः ॥१७॥
कर्णातो द्विगुणं भद्रं पादोनप्रतिरर्थकम् ।
भद्रार्धं मुखभद्रं च शेषं षट्कवसुभाजिते ॥१८॥

दलेनार्धेन पादेन दलस्य निर्गमो भवेत् ।
मूलप्रासादवद् ब्राह्मे पीठजङ्घादिमेखला ॥१९॥
गवाक्षेनान्वितं भद्रमथ जालकसंयुतम् ।
गुहश्च कर्णगुहे वा भद्रे चन्द्रावलोकनम् ॥२०॥
त्रिद्वारे चैकचक्रेऽथ मुखे कार्या चतुष्किका ।
गुहे प्रकाशके शृङ्गमर्धोदयकरोटकम् ॥२१॥
इत्यष्टगूढमण्डपाः ।
एकत्रिवेदसप्ताङ्कचतुष्काश्च त्रिकं त्रये ।
अर्धभाद्रं विभागेन पार्श्वयोरग्रतस्तथा ॥२२॥
अग्रतस्त्रिचतुष्कस्य तथा पार्श्वे द्वयेऽपि च ।
मुक्तकोणे चतुष्के द्वे इति द्वादशमण्डपाः ॥२३॥
गुहस्याग्रे प्रकर्तव्यास्तथा नानाचतुष्किका ।
चतुरस्रादिभेदेन वितानैर्बहुभिर्युता ॥२४॥
इति द्वादशमण्डपाः ।
त्रिकाग्रे रङ्गभूमाथ तत्र वै नृत्यमण्डपाः ।
सप्तविंशतिरुक्ता ये मण्डपा विश्वकर्मणा ॥२५॥
तलैस्तु विषमैस्तुल्यैः क्षणैः स्तम्भैः समैस्तथा ।
प्रथमो द्वादशस्तंभो द्विद्विस्तंभविवर्धनात् ॥२६॥
यावत्षष्टिचतुर्युक्ताः सप्तविंशतिमण्डपाः ।
क्षेत्रार्धस्य षडंशोना चैकास्राष्टास्रमुच्यते ॥२७॥
कलास्रे क्षेत्रषड्भागस्तत्षडंशेन संयुतः ।
अष्टास्रे षोडशास्रे च वृत्तं कुर्यात्तदूर्ध्वतः ॥२८॥
उदयं विस्तरार्द्धेन तं षष्ठंवांशभाजयेत् ? ।
कर्णादर्दरिका सप्तभागेन निर्गमो तुरुच्छ्ता ॥२९॥

रूपकण्ठं तु पञ्चांशं द्विभागेनात्र निर्गमम्।
विद्याधरैः समायुक्तं षोडशाष्टदिवाकरैः ॥३०॥
जिनसंख्यामितैर्वापि दन्ततुल्यैर्विराजितैः।
विद्याधरः पृथुत्वेन सप्तांशो निर्गमोदयः ॥३१॥
तदूर्ध्वे चित्ररूपाश्च नर्तक्यो नृत्यशोभिताः।
गजतालस्तु षट्सार्द्धा प्रथमा द्वितीया तु षट् ॥३२॥
तृतीया सार्धपञ्चांशा कोलानि त्रीणि पञ्चच।
मध्ये वितानं कर्तव्यं चित्रवर्णविराजितम् ॥३३॥
नाटकादिकथारूपैर्नानाकारविराजितम्।
एकादशशतान्येव वितानानां त्रयोदश ॥३४॥
शुद्धसंघाटमिश्राणि क्षिप्ताक्षिप्तानि यानिच।
वितानानि विचित्राणि वस्त्रचित्रादिभेदतः ॥३५॥
तानि लोके प्रवर्तन्ते तस्मादूध्वनिलोकतः?।
मण्डपेषु च सर्वेषु पीठान्ते रङ्गभूमिका ॥३६॥
कुर्यादूतानपादेन?चित्रपाषाणजेन च।

इति मण्डपाः।

बलाणदेवगेहाग्रे राजद्वारे गृहे पुरे।
जलाशयेऽथ कर्तव्यं सर्वेषां मुखमण्डपम् ।३७॥
जगतीपादविस्तीर्णं पादपादेन वर्जितम्।
शालापादेन गर्भेण प्राभादेन समं भवेत् ॥३८॥
उत्तमे कन्यसं मध्ये मध्यं ज्येष्ठे तु कन्यसम्।
एकद्वित्रिचतुःपञ्चरससप्तपदान्तरे ॥३९॥
मूलप्रासादवद्द्वारं मण्डपे च बलाणके।

न्यूनाधिकं न कर्तव्यं दैर्घ्ये हस्ताङ्गुलादिकम् ॥४०॥
पेटकं चोत्तराङ्गानां सर्वेषां समसूत्रतः ।
अङ्गणा तु समं पेटं जगत्याश्चान्तराङ्गजम् ॥४१॥
जगत्यग्रे चतुष्कीयां वामनं तद्बलाणकम् ।
वामेऽथ?दक्षिणद्वाराद्वादिका मत्तवारणम्॥४२॥
ऊर्ध्वा भूमिः प्रकर्तव्या नृत्यमण्डपसूत्रतः ।
मत्तवारणकं वेदी वितानतोरणैर्युता ॥४३॥
राजद्वारे बलाणे च पञ्च वा सप्तभूमिका ।
तद्विमानं बुधैः प्रोक्तं पुष्करं वारिमध्यतः ॥४४॥
हर्म्यराजगृहे वापि कर्तव्यं गोपुराभितः ।
एकभूमौ त्रिभूम्यन्तं गृहद्वारस्य मस्तके ॥४५॥

इति पञ्चविधबलाणकम् ।

संवर्णश्च प्रकर्तव्यं प्रथमा पञ्चघण्टिका ।
चतुर्घण्टाभिवृद्ध्या च यावदेकोत्तरं शतम् ॥४६॥
पञ्चविंशतिरित्युक्ता प्रथमा वसुभागिका ।
वेदोत्तरशतं यावत् वेदांशा वृद्धिरिष्यते ॥४७॥
भद्रार्धे रथिकार्धेन तवङ्गं वामदक्षिणे ।
अर्धोदयेन रथिका घण्टाकूटं तवङ्गकम् ॥४८॥
कलाकूटान्विता पूर्वा पञ्चभिः कलशैर्युतः ।
भागतुल्यैस्तथा सिंहैरेवमन्याश्च लक्षिताः ॥४९॥

इति मण्डपस्योर्ध्वसंवर्णाः ।

इति श्रीमण्डपबलाणकं संवर्णाधिकारः

सप्तमोऽध्यायः ॥७॥

अथ अष्टमोऽध्यायः।

अथ साधारणोऽध्यायः सर्वलक्षणसंयुतः ।
विश्वकर्मप्रसादेन विशेषेण प्रकथ्यते ॥१॥
मानं न्यूनाधिकं वापि स्वयम्भूबाणरत्नजे।
घटितेषु विधातव्यमर्चालिङ्गेषु शास्त्रतः ॥२॥
बहुलसमं सन्धिशिरो गुरुः................।
स्वशल्यं पादहीनं तु तच्च वास्तु विनश्यति॥३॥
अन्यवास्तुचिते द्रव्ये ह्यन्यवास्तुनिवेशिते।
प्रासादे न भवेत्पूजा गृहे तु न व....त्पतिः ॥४॥
स्वस्थाने संस्थितं यच्च लिप्रवास्तु शिवाळयम् ।
अचाल्यं सर्वदेशेषु चालिते राष्ट्रविभ्रमः ॥५॥
वापीकूपतडागानि प्रासादभवनानि च ।
जीर्णान्युद्धरते यस्तु पुण्यमष्टगुणं लभेत् ॥६॥
तद्रूपं तत्प्रमाणं स्यात्पूर्वसूत्रं न चालयेत्।
हीने तु जायते हानिरधिके तु धनक्षयः ॥७॥
वास्तुद्रव्याधिकं कुर्यात्काष्ठजे शैलजेऽपि वा।
शैलजे धातुजे चैव धातुजे रत्नजे ऽथवा ॥८॥
पूर्वोत्तरदिश मूढमूढं पश्चिमदक्षिणे।
तत्र मूढममूढं वा यत्र ती ˚ समाहितम्। ९॥
सिद्धायतनतीर्थेषु नदीनां सङ्गमेषु च ।
स्वयम्भूबाणलिङ्गेषु तत्र दोषो न विद्यते ॥१०॥
अव्यक्तं मृन्मय चाल्यं त्रिहस्तान्तं तु शैलजम्।
दारुजं पुरुषार्धं च अत ऊर्ध्वं न चालयेत् ॥११॥

विषमस्थानमाश्रित्य भग्नं यत्स्थापितं सुरैः ।
तत्र स्थानस्थिता देवा भग्नाः पूजाफलप्रदाः ॥१२॥
यद्यथा स्थापितं वास्तु तत्तथैव हि कारयेत् ।
अव्यङ्गं चालितं नृणां दारुणं कुरुते भयम् ॥१३॥
अर्थनश्चालतः प्रज्ञो जीर्णाव्यङ्गं च दूषितम् ।
आचार्यः शिल्पिभिः प्राज्ञैः शास्त्रदृष्टया समुद्धरेत ॥
स्वर्णजं रौप्यजं वापि कुर्यान्नागमथो वृषः ।
तस्य शृङ्गेण दन्तेन पतितं पातयेत्सुधीः ॥१५॥

इति जीर्णोद्धारविधिः ।

तन्दुलं जालकं चैव कीलकं सुशिरं तथा ।
छिद्रसन्धिश्च काराश्च महादोषा इति स्मृताः ॥१६॥
भिन्न दोषकर यस्मात्प्रासादमठमन्दिरम् ।
शिरवाभिर्जालकैर्द्वारै रश्मिवातप्रभेदितम् ॥१७॥
ब्रह्मविष्णुशिवार्काणां भिन्नं दोषकरं नहि ।
जिनगौरीगणेशानां गृहं भिन्नं विवर्जयेत् ॥१८॥
व्यक्ताव्यक्तं गृहं कुर्याद् भिन्नं भिन्नानुमूर्तिकम् ।
अथ स्वामिशरीरं स्यात्प्रासादमपि तादृशम् ।१९।

इति भिन्नदोषाः ।

भिन्नं चतुर्विधं ज्ञेयमवृद्धामिश्रकं मतम् ।
मिश्रकं पुजितं तत्र भिन्नं वै दोषकारणम् ॥२०॥
छन्दोभेदो न कर्तव्यो जातिभेदस्तथा पुनः ।
उत्पद्यते महामर्म जातिभेदे कृते सति ॥२१॥
द्वारहीने हरेच्चक्षुर्नालहीने धनक्षयम् ।
अपदस्थापिते स्तम्भे महारोगं विनिर्दिशेत् ॥२२॥

स्तम्भव्यासोदये हीने कर्ता तत्र विनश्यति।
प्रासादे पीठहीने तु नश्यन्ति गजवाजिनः ॥२३॥
रथोपरथहीने तु कर्ता तत्र विनश्यति।
प्रासादे पीठहीने तु नश्यन्ति गजवाजिनः ॥२४॥
रथोपरथहीने तु प्रजापीडां विनिर्दिशेत्।
कर्णहीने सुरागारे फलं तत्र न विद्यते ॥२५॥
जङ्घाहीने हरेद्बन्धून् कर्तृकान् कारकादिकान्
शिखरे हीनमाने तु पुत्रपौत्रधनक्षयः ॥२६॥
अतिदीर्घे कुलच्छेदो ह्रस्वे व्याधिसमुद्भवः।
तस्माच्छास्त्रीयमानेन सुखदं सर्वकामदम् ॥२७॥
जगत्यां रोपयेच्छालां शालायां चैव मण्डपम्।
मण्डपेन च प्रासादो ग्रस्तो वै दोषकारकः ॥२८॥
इति दोषाः।

प्रासादोच्छ्रायविस्ताराज्जगती वामदक्षिणे।
छायाभेदेन कर्तव्या तथा लिङ्गस्य पीठिका ॥२९॥
जगत्यां त्रिचतुःपञ्चगुणं देवपुरं त्रिधा।
एकद्विवेदसाहस्रहस्तैः स्याद्राजमन्दिरम् ॥३०॥
कलाष्टवेदभाहस्तैर्हस्तै राजपुरं समम्।
दैर्घ्यतुल्यं सपादाष्टं सार्धांशेनाधिकं शुभम् ॥३१॥
द्वादश त्रिपुराणि स्युर्देवस्थानानि चोत्तरे।
षट्त्रिंशत् षट्विवृध्या च यावदेकोत्तरं शतम् ॥३२॥
पुरं प्रासादगेहैः स्यात्सौधैर्जालगवाक्षकैः।
कीर्तिस्तम्भैर्जलारामैर्गेहैर्मण्डैः सुशोभितम् ॥३३॥
इति देवपुरराजपुराणि।

प्रासादस्योत्तरे याम्ये तथाग्नौ पश्चिमेऽपि च।
यदि नामाश्रमं कुर्यात्सततं द्वित्रिभूमिकम् ॥३४॥
द्विशालं मध्यषट्दारुपट्टशालाग्रशोभितम्।
मत्तवारणमग्रे च तदूर्ध्वं पट्टभूमिषु ॥३५॥
कोष्ठागारं च वायव्ये वह्निभागे महानसम्।
पुष्पगेहं तथेशाने नैर्ऋत्येशान्तमायुधम् ॥३६॥
छात्रागारं च पुरतो वारुण्यां च जलाश्रयम्।
मठस्योपरितः कुर्याद्विधाव्याख्यानमण्डपम् ॥७३॥
इति मठः।
पूर्वोक्ता........पुण्याहप्रतिष्ठा सर्वसिद्धिदा।
रवेः सौम्यागने कुर्याद्देवानां स्थापनादिकम् ॥३८॥
प्रतिष्ठा चोत्तरामूल आर्द्रायां च पुनर्वसौ।
पुष्ये हस्ते मृगे स्वातौ रोहिण्यां श्रुतिमैत्रभे ॥३९॥
तिथि रिक्तां कुजं धिष्ण्यं क्रूर विधुयुतं तथा।
दग्धां तिथिं च गण्डान्तं चारभोपग्रहं त्यजेत् ॥४०॥
सुदिने सुमुहूर्ते च लग्ने सौम्ययुतेक्षिते।
अभिषेकः प्रतिष्ठा च प्रवेशादिकमिष्यते ॥४१॥
प्रासादाग्रे तथैशाने उत्तरे मण्डपं शुभम्।
त्रिपञ्चसप्तनन्दैकादशविश्वकराननम् ॥४२॥
मण्डपः स्यात्करैरष्टादशद्व्यैकलामितैः।
षोडश हस्ततः कुण्ड वशादधिक इष्यते ॥४३॥
स्तम्भैः षोडशभिर्युक्तं तोरणादिविराजितम्।
मण्डप वेदिकामध्ये पञ्चाष्टनवकुण्डकम् ॥४४॥
हस्तमात्रं भवेत्कुण्डं मेखलायोनिसंयुतम्।

आगमैर्वेदमन्त्रैश्च होमं कुर्याद्विधानतः ॥४५
अयुतं हस्तमात्रे च लक्षार्धे तु द्विहस्तकम् ।
त्रिहस्तं लक्षहोमे स्याद्दशलक्षे चतुष्करम् ॥४६॥
विंशलक्षे पञ्चहस्तं कोट्यर्धे षट्करं मतम् ।
अशीतिलक्षेऽद्रिकरं कोटिहोमेऽष्टहस्तकम् ॥४७॥
ग्रहपूजाविधाने च कुण्डमेककरं भवेत् ।
मेखलात्रितयं वेद रामयुग्माङ्गुलैः क्रमात् ॥४८॥
एकद्वित्रिकरं कुर्याद्वेदिकोपरि मण्डलम् ।
ब्रह्मविष्णुरवीनां तु सर्वतोभद्रमिष्यते । ४९॥
भद्रं तु सर्वदेवानां नवनाभिस्तथा त्र्यम्‌ ।
लिङ्गोद्भवं शिवस्यापि लतालिङ्गोद्भवं तथा ॥५०॥
भद्रं च गौरीतिलकं देवीनां पूजने हितम्।
अर्धचन्द्रं तडागेषु चापाकारं तथैव च ॥५१॥
टङ्काभं स्वस्तिकं चैव वापीकूपेषु पूजयेत् ।
पीठिकाजलपादेषु योन्याकारं तु कामदम् ॥५२॥
गजदन्तं महादुर्गे प्रशस्तं मण्डलं भवेत् ।
टङ्काभं चतुरस्रं च गजदन्तमिहायतम् ॥५३॥
विख्यातं सर्वतोभद्रं ज्ञेयान्यन्यानि लोकतः ।
पूर्वादितोरणं प्लक्षयज्ञाङ्गवटपिप्पलैः ॥५४॥
द्वात्रिंशत्षोडशाष्टौ च उत्तमान् वेदपारगान् ।
कुलीनानङ्गसर्वज्ञान्यज्ञार्थमभिमन्त्रयेत् ॥५५॥
मण्डपस्य त्रिभागेन उत्तरे स्नानमण्डपम् ।
स्थण्डिलं वालुकं कृत्वा शम्यया स्नापयेत्सुरम् ५६॥

पञ्चगव्यैः कषायैश्च वल्कलैः क्षीरवृक्षजैः ।
स्नापयेत्पञ्चकलशैः शतवारं जलेन च ॥५७॥
वेदमन्त्रादिवादित्रगीतमङ्गलनिःस्वनैः ।
वस्त्रेणाच्छादयेद्देवं वेद्यांतं मण्डपं नयेत् ॥५८॥
तल्पमारोपयेद्देव्यामुत्तराशिरो न्यसेत्ततः ।
कलशं तु शिरोदेशे पादस्थाने कमण्डलुम् ॥५९॥
वज्रं वैडूर्यकं मुक्तामिन्द्रनीलं सुनीलकम् ।
पुष्परागं च गोमेदं चंद्रं पूर्वादितो न्यसेत् ॥६०॥
व्यजनं दक्षिणे देशे दर्पणं वामतः शुभम् ।
रत्नन्यासं ततः कुर्याद्दिक्पालादिकपूजनम् ॥६१॥
आग्नेय्यां गणपं विद्यादीशाने ग्रहमण्डलम् ।
नैर्ऋत्ये वास्तुपूजा च वायव्ये मातरः स्मृताः ॥६२॥
वज्रं वैडूर्यकं मुक्तामिन्द्रनीलं सुनीलकम् ।
पुष्परागं च गोमेदं चन्द्रं पूर्वादिषु यजेत् ॥६३॥
सुवर्णं रजतं ताम्रं कांस्यं रीतिं च सीसकम् ।
वङ्गं लोहं च पूर्वादिदिक्षु धातूनिह न्यसेत् ॥६४॥
वज्रं वह्निः सहदेवी विष्णुक्रान्तेन्द्रवारुणी ।
शङ्खिनीज्योतिष्मती चैव स्वरित्तानि क्रमान्न्यसेत्
यवव्रीहिस्तथा कङ्गुर्जूर्णाख्या च तिलैर्युता ।
शालिमुद्गाः समाख्याता गोधूमाश्च क्रमेण तु ॥६६॥
यद्देवाभरणं पूजावस्त्रालङ्कारभूषणम् ।
तत्सर्वं शिल्पिने देयमाचार्याय तु याज्ञिकम् ॥६७॥
ततो महोत्सवं कुर्यान्नृत्यगीतैरनेकशः ।
नैवेद्यारार्तिकं पूजामङ्गन्यासादिकं तथा ॥६८॥

क्षीरं क्षौद्रं घृतं खण्डपक्वान्नानि बहून्यपि।
षड्रसाः स्वादुभक्ष्याणि समन्तात्परिकल्पयेत् ॥६९॥
विप्राणां सम्प्रदायाच्च वेदमन्त्रैस्तथागमैः।
सकलीकरणं जीवन्यासं कृत्वा प्रतिष्ठयेत् ॥७०॥
प्रासादे देवतान्यासं स्थावरेषु पृथक्पृथक्।
खरशिलायां च वाराहं पीठ्यां नागकुलानि च। ७१
प्रकुम्भे जलदेवाश्च पुष्पके किंसुरास्तथा।
नन्दिनी जाड्यकुम्भे च कल्याण्यां स्थापयेद्धरिम् ॥७२
गणेशं गजपीठे च अश्वपीठे तथाश्विनौ।
नरपीठे नरांश्चैव क्षमां च खुरके यजेत् ॥७३॥
भद्रे सिद्धित्रयं कुम्भे पार्वतीं कलशे स्थिताम्।
कपोताल्यां च गन्धर्वान्मञ्चिकायां सरस्वतीम् ॥७४॥
जङ्घायां च दिशापालानिन्द्रमुद्गमसंस्थितम्।
सावित्रीं भरणे देशे शिरावट्यां च देविकाम् ॥७५॥
विद्याधरान् कपोताल्यामन्तराले सुरांस्तथा।
पर्यङ्कंकुंठच्छाद्ये च ततो मध्ये प्रतिष्ठयेत् ॥७६॥
शाखयोश्चन्द्रसूर्यौ च त्रिमूर्तिश्चोत्तराङ्गके।
उदुम्बरे स्थितं यक्षमश्विनावर्धचन्द्रके। ७७॥
कौलिकायां धराधारं क्षितिं चोत्रं नृपट्टके।
स्तम्भेषु पर्वतांश्चैवमाकाशं च करोटके ॥७८।
मध्ये प्रतिष्ठयेद्देवं मकरे जाह्नवीं तथा।
शिखरस्योरुशृङ्गेषु पञ्च पञ्च प्रतिष्ठयेत् ॥७९
ब्रह्मा विष्णुस्तथा रुद्र ईश्वरश्च सदाशिवः।
शिखरे चेश्वरं देवं शिखायां तु सुराधिपम् ॥८०॥

ग्रीवायाममरे देवं मण्डपे च निशाकरम् ।
पद्मान्तं पद्मपत्रं च कलशे च सदाशिवम् ॥८१॥
सद्यो वाम अघोरस्तत्पुरुष ईश एवच ।
कर्णादिभद्रपर्यन्तं पञ्चाङ्गे तान् प्रतिष्ठयेत् ॥८२॥
इति स्थावरप्रतिष्ठा ।
प्रथमं देवताहृष्टेर्दर्शयेद्धन्नपर्वतम् ।
विप्रं कुमारिकां वास्तुं ततो लोकान्प्रदर्शयेत् ॥८३॥
ईज्यानन्तरतः कुर्यात्सूत्रधारस्य पूजनम् ।
वस्त्रालङ्कारभूवित्तगोमहिष्याश्ववाहनैः ॥८४॥
अन्येषां शिल्पिनां पूजा कर्तव्या कर्मकारिणाम् ।
स्वाधिकारानुसारेण वस्त्रताम्बूलभोजनैः ॥८५॥
काष्ठपाषाणनिर्माणकारिणो यत्र मन्दिरे ।
भुञ्जते तत्र भोक्तासौ शङ्करस्त्रिदशैः सह ॥८६॥
पुण्य प्रासादजं स्वामी प्रार्थयेत्सूत्रधारतः ।
सूत्रधारो वदेत् स्वामिन्न क्षयं भवतात् तव ॥८७॥
इति सूत्रधारपूजा ।
आचार्यपूजनं कृत्वा वस्त्रस्वर्णधनैः सह ।
दानं दद्याद्द्विजातिभ्यो दीनान्धदुर्बलेषु च ॥८८॥
सर्वेषां धनमाधारः प्राणिनां जीवनं परम् ।
वित्ते दत्ते प्रतुष्यन्ति मानुष्याः पितरः सुराः ॥८९॥
इति प्रतिष्ठाविधिः ।
प्रतिष्ठा वित्तरागस्य जिनशासनमार्गतः ॥९०॥
नवकारैः सूरमन्त्रैश्च सिद्धिः केवलभाषितम् ।
ग्रहाः सर्वज्ञदेवाश्च पादपीठे प्रतिष्ठिताः ॥९१॥

येनानन्तविभेदेन मुक्तिमार्ग उदाहृतः। ॥६१॥
जिनानां मातरो यत्र यक्षिणी गौतमी तथा।
सिद्धा कालत्रयो जाताश्चतुर्विंशतिमूर्तयः ॥६२॥
इति स्थाप्यं जिनाचारे त्रिप्राकारं गृहं तथा।
सावन्तशिखरं?मन्दिरमष्टापदादिकम् ॥६३॥
प्रासादो वीतरागस्य पुरमध्ये सुखावहः।
कल्याणकारिवर्गस्य चतुर्दिक्षु प्रकल्पयेत ॥६४॥

इति जिनप्रतिष्ठा।

माघादिपञ्चमासेषु वापीकूपादि संस्मृतम्।
तडागस्य चतुर्मासं कुर्यादाषाढमार्गयोः ॥९५॥
असंस्कृतं जलं देवाः पितरो न पिबन्ति ते।
संस्कृते तृप्तिमायान्ति तस्मात्संस्कारमाचरेत ॥९६॥
जीवनं वृक्षजन्तूनां यः करोति जलाशयम्।
दत्ते वा स लभेत्सौख्यमुर्व्यां स्वर्गे च मानवः ॥९७॥
पुरान्धकवधे रुद्रललाटात्पतितः क्षितौ।
स्वेदस्तस्मात्समुद्भूतं भूतमत्यन्तदुःसहम् ॥९८॥
गृहीत्वा सहसा देवैर्न्यस्तं भूमावधोमुखम्।
जानुनी कोणयो पादौ रक्षो दिशि शिवे शिरः ॥९९॥
चत्वारिंशद्युता पञ्च वास्तुदेहे स्थिताः सुराः।
देव्योऽष्टौ बाह्यगास्तेषां वसनाद्वास्तुरुच्यते ॥१००॥
अधोमुखेन विज्ञप्तैस्त्रिदशैर्विहितो बलिः।
तेनैव बलिना शान्तिं कुरुते हानिमन्यथा ॥१०१॥
प्रासादभवनादीनां प्रारम्भे परिवर्तने
वास्तुकर्मसु सर्वेषु पूजितः सौख्यदो भवेत् ॥१०२॥

एकपदादितो वास्तु यावत्पदसहस्रकम् ।
द्वात्रिंशन्मण्डलानि स्युः क्षेत्रतुल्याकृतीनि च ।१०३
एकाशीतिपदो वास्तुश्चतुषष्टिपदोऽथवा ।
सर्ववास्तुविभागेषु पूजयेन्मण्डलद्वयम् ॥१०४॥
ईशो मूर्द्धनि पर्जन्यो दक्षिणं कर्णमाश्रितः ।
जयःस्कन्धे महेन्द्राद्याः पञ्च दक्षिणबाहुगाः ।१०५।
महेन्द्रः सूर्यः सत्यश्च भृश आकाशमेव च ।
वायुर्जानुनि पूषाद्याः सप्त पादतले स्थिताः ।१०६।
पूषा च वितथश्चैव गृहक्षतयमावुभौ ।
गन्धर्वो भृङ्गराजश्च मृगःसप्त सुरा इति ॥१०७॥
पादयोः पितरस्तस्मात्सप्तपादतलस्थिताः ।
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ।१०८
असुरः शोष पापौ च रोगो जानुनि संस्थितः ।
अहिर्मुख्यश्च भल्लाटः सोमसर्पौच बाहुगौ ॥१०९॥
अदितिस्त्वधोदेशे च वामे कर्णे दितिः स्थितः ।
द्वात्रिंशद्बाह्यगा देवा नाभिपृष्ठे स्थितो विधिः११०
अर्यमा दक्षिणे वामे स्तने तु पृथिवीधरः ।
विवस्वानऽथ मित्रश्च दक्षवामोरुगावुभौ ॥१११॥
रुद्रश्च राजयक्ष्मा च आपवत्सो हृदि स्थितः ।
सावित्रः सविता तद्वत्करं दक्षिणमाश्रितौ ॥११२॥
इन्द्र इन्द्रजयो मेढ्रे भद्रोऽसौ वामहस्तके
भद्रदासोऽपि तत्रैव इति देवमयं वपुः ॥११३॥
ईशाने चरकी बाह्ये पिलिपिच्छस्तु पूर्वतः ।
विदारिकाग्निकोणे च विजृम्भापांदिगास्थिता ११४

नैर्ऋत्यें पूतना स्कन्धे पश्चिमे वायुकोणके।
पापराक्षसिका सौम्येऽर्यमा वै सर्वतोऽर्चयेत्॥ ११५
हेरुकादिबलिर्देयो माषान्नैः सुरयामिषः।
अपरान् वटकान्नैश्च सर्वान् स्वर्णसुगन्धिभिः ११६

इति वास्तुपुरुषन्यासः।

एकेन शास्त्रेण गुणाधिकेन
विना द्वितीये न पदार्थसिद्धिः।
तस्मात्प्रकारान्तरतो विलोक्य
मणीगुणाढ्योऽपि सहायकांक्षी॥
श्रीविश्वकर्मगणनाथमहेशचण्डी —
श्रीविश्वरूपजगदीश्वरसुप्रसादात्।
प्रासादमण्डन मिदं रुचिरं चकार
श्रीमण्डनो गुणवतां भुवि सूत्रधारः।

इति श्रीसूत्रधारमण्डनविरचिते वास्तुशास्त्रे
प्रासादमण्डनेऽष्टमोऽध्यायः॥८॥

इति प्रासादमण्डनं समाप्तम्॥

